Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ जिना जयन्तु जितमोहाः ॥

प्रबन्धशतकर्तृ - महाकवि - श्रीरामचन्द्रविरचितं

# मल्लिकामकरन्दनाटकम्

॥ ॐ नमः श्रीसरस्वत्यै ॥

**मल्लिकाविशदां लक्ष्मीं प्राप यः शिवसम्भवाम् ।**
**प्रत्यूहव्यूहतो मुक्तं तं जिनेशमुपास्महे ॥१॥**

( नान्द्यन्ते )

**सूत्रधारः** –( सविनयमञ्जलिं मूर्धनि विधाय ) हंहो समाजलोकाः ! क्षणमेकमवधानमाधाय सकलबाल-गोपालाङ्गनाहृदयसंवादिनीं विपश्चिच्चक्रवालचेतश्चमत्कारकन्दकन्दलनकादम्बिनीं समाकर्णयत वितीर्णसकर्णकर्णकोटरसुधाधाराभिषेकां मदीयां विज्ञप्तिकामेकाम् –

**पटुभिरपि नोपसर्पति चटुभिरयं निष्प्रयोजनो लोकः ।**
**तत् किमपि शिक्षणीयं प्रयोजनं येन जगतोऽपि ॥२॥**

तत् पुनर्जन्मसहस्रोपार्जितपुण्यनैपुण्यैर्निःशेषसांसारिकप्रयोजनप्ररोहक्षमां भगवतीं लक्ष्मीमनुकूलितवद्भिर्भवद्भिः शिक्षितमेव । यतः –

**द्वयं द्वयस्य सम्पत्ति(त्ते)र्बीजमाद्यमखण्डितम् ।**
**संसारकर्मणां लक्ष्मीः प्रशमः शिवशर्मणाम् ॥३॥**

अतोऽहं लक्ष्मीलवलाभश्रद्धाग्रहिलान्तःकरणो निरन्तरावलोकनैर्नाट्यदर्शनसुखविमुखानामपि भवतामाराधनाय प्रवृत्तोऽस्मि ।

( आकाशे कर्णं दत्वा )

किमादिशत ? । वाग्मी खल्वसि, एतावतैव भवतो वाचां विलासेन वयमत्यन्तमामोदिताः । सत्यम् , न जानीमः प्रबन्धदर्शने किमपि भविष्यति ? इति ।

( सहर्षम् )

अपरां तर्हि विज्ञापनामेकामाकर्णयत – रसपीयूषपूरपूर्णचेतसः सुमेधसः पुरस्कृत्य महाकवयो नाट्यप्रबन्धानाबध्नन्ति । न पुनः कलगीतिकामिनीभ्योऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विमुखान् महासुभटोत्साहदर्शनेऽपि अरोमाञ्चकञ्चुकान् मातृ-पितृ-भ्रातृ-सुतविपत्ताव्प्यनार्द्रमानसान् , निर्व्याजसेवकेऽप्यस्वीकृतवात्सल्यान् पाषाणसुहृदो दुर्मेधसः।

( आकाशे )

किं ब्रूथ? भोः! किमेताभिर्भणितिभिः? अकुटिलमेव प्रकाशय विवक्षितमर्थम् । एष तर्हि श्रवणपरुषमप्यकुटिलमेव विज्ञापयामि –

**नीरसानां पुरो नाट्यं दुर्जनानां पदातिताम् ।**
**ग्राम्याणां वाग्मितां कुर्वन् हास्यो ब्रह्माऽपि जायते ॥४॥**

( प्रविश्य सरोषः )

**नटः** – भाव ! सर्वतः प्रसिद्धवैदग्ध्यान् अशेषरसिकावतंसान् सभ्यमिश्रान् अलीकवाचालतया प्रकोपयसे । विमुञ्च बहुभाषिताम् । पर्यालोचय किमपि प्रबन्धमभिनयाय ।

**सूत्रधारः** – ( सभयम् ) मार्ष ! मा कोपीः, अविज्ञातसभ्यप्रगल्भोऽहं भूयोभूयः प्रलपितवान् ।

**विनाऽभिप्रायदौरात्म्यं नापराधोऽपि गर्हितः ।**
**आचार्यो वाणि-पाणिभ्यां ताडयन्नपि पूज्यते ॥५॥**

प्रबन्धविशेषं पुनः प्रथममेव पर्यालोच्य सभ्यानुपस्थितोऽस्मि ।

**नटः** – कः पुनरसौ ? ।

**सूत्रधारः** – विद्यात्रयीसर्गनिसर्गनदीष्णचेतसो निःशेषचक्रवर्त्तिचक्रचूडारत्नांशुपुञ्जपिञ्जरितपादपीठस्य सप्तार्णवीकूलसङ्क्रान्तकान्तयशसः श्रीमदाचार्यहेमचन्द्र[स्य] शिष्येण **प्रबन्धशतकारिणा रामचन्द्रेण** विरचितं **म ल्लि का म क र न्दा** भिधानं नाटकं नाटयितव्यम् ।

**नटः** – ( सावज्ञम् ) भाव ! प्रशमरसिकवैदुष्येण धर्मदेशनाविधानैकप्रगल्भवाचो वाचंयमाः शृङ्गार-हास्य-वीरप्रमुखरसमयानामनर्हाः खलु नाट्यप्रबन्धानाम् ।

**सूत्रधारः** – मार्ष ! साम्प्रतं ग्रामीणचातुरीवन्ध्यमभिदधासि ।

**शमस्तत्त्वं मुनीन्द्राणां जानते तु जगन्त्यपि ।**
**जन्मैव दिवि देवानां विहारो भुवनेष्वपि ॥६॥**

**नटः**– ( सरोषम् )

**परोपनीतशब्दार्थाः स्वनाम्ना कृतकीर्त्तयः ।**
**निबन्धारोऽधुना तेन विश्रम्भस्तेषु कः सताम् ? ॥७॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सूत्रधारः** –(सावष्टम्भम्) अत्रार्थे स्वयमेव कविना दुर्मेधसां मुखबन्धः कृतः ।

**काव्यैर्यत्र कविप्रथा धनलवक्रीतैरपि प्राप्यते**
**गुम्फक्लेशमुपासितुं कृतधियां कस्तत्र काले क्रमः ? ।**
**ग्रथ्नन्तस्तदपि प्रबन्धकुसुमान्याजन्म खिद्यामहे**
**कुप्यामो व्यसने चिरं विरचिते कस्मै परस्मै वयम् ? ॥८॥**

( नेपथ्ये )

साधु भो भरत ! साधु, बान्धवोचितं समयोचितं श्रावितवानसि ।

**सूत्रधारः** – कथमेष मकरन्दनेपथ्यवाही भरतो भारतीमास्माकीनामनुमोदते ? ।

**नटः** – भाव ! त्वरस्व त्वरस्व, संरब्धाः सर्वतोऽपि रङ्गोपजीविनः, समुत्सुकोऽहं मनःसमीहितामर्थसिद्धिमासादयितुं सामाजिकेभ्यः ।

[ **सूत्रधारः** – ] मार्ष ! मा त्वरिष्ठाः ।

**सर्वाऽपि महती सिद्धिः क्लेशान्तरितसम्भवा ।**
**विद्यावधूटिमाप्नोति सोढा काय-मनःक्लमान् ॥९॥**

( नेपथ्ये )

इयं पुनरुपश्रुतिरस्माकं वधूलाभपुरस्सरां महार्थसिद्धिसम्पत्तिं पिशुनयति ।

**सूत्रधारः** – मार्ष ! तदलं वाचां विस्तरेण । एहि, करणीयान्तरमनुतिष्ठामः ।

( इति निष्क्रान्तौ । )

## ॥ आमुखम् ॥

*

( ततः प्रविशति मकरन्दः )

**मकरन्दः** – परमार्थोऽयम् –

**"कुप्यामो व्यसने चिरं विरचिते कस्मै परस्मै वयम् ?"**

न नाम द्युतकाराः सभिको वा प्रसह्य मां दूरोदरकर्मणि व्यापारयन्ति । तदत्र प्राचीनजन्मसहस्रोपार्जितानि दुष्कर्माण्येवापराध्यन्ति; न चाहम् , न च बाह्यो लोकः ।

( साश्चर्यम् )

**कौपीनं वसनं कदन्नमशनं शय्या धरा पांशुला**
**जल्पोऽश्लीलगिरः कुटुम्बकजनो वेश्याः सहाया विटाः ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यापाराः परवञ्चनानि सुहृदश्चौरा महान्तो द्विषः
प्रायः सैष दुरोदरव्यसनिनां संसारवासक्रमः ॥१०॥

तथापि द्युतकारस्य पापध्वान्तान्धचेतसः ।
शक्रेऽपि रङ्कसङ्कल्पो द्यूतकर्मपराङ्मुखे ॥११॥

( सपश्चात्तापम् ) तथाविधाया विशुद्धवंशोत्पत्तेस्तथाविधश्रुताध्ययनस्य तस्याश्च गुरूपदेशपरम्परायाः स एष दोषनिश्शेषमूलं महापुरुषगर्हितो व्यापारः फलमभूत् । तदहमेतस्य व्यसनपरम्परापात्रस्य पापीयसः स्वात्मनः शस्त्राभिघातेन कण्ठपाशप्रदानेन वा प्रायश्चित्तमाधास्यामि । यदि वा –

प्रायश्चित्तं नये वृत्तिः श्लाघ्यमश्लाघ्यकर्मणः ।
शस्त्रादिभिस्तु पश्चत्वमाततायिविचेष्टितम् ॥१२॥

तत् तावदेतस्य सहकारशाखाकुलायनिलीनकोकिलाबन्दिवृन्दोद्घुष्यमाणवसन्तमहाराजावतारस्य विकाशिपाटलापटलगन्धसम्बन्धबन्धुरितगन्धवाहनिपीयमानपुरपुरन्ध्रीसुरतसम्परायखेदस्वेदाम्भसो मध्यमध्यास्य महोद्यानस्य त्रियामामेतामतिवाहयामि । प्रभातभूयिष्ठायां चास्यां द्यूतकारदृष्टिसञ्चारपरिहारेण किमपि स्थानान्तरमाश्रित्य कुलिनोचितमाचरिष्यामीति । ( पुरोऽवलोक्य ) कथमिदं दीप्रदीपप्रभाप्रकाशितं देवतायतनम् ? मध्ये च भगवतः पञ्चबाणस्य प्रतिमा ? । ( सविनयं प्रणम्य )

शम्भु-स्वयम्भु-हरयो हरिणेक्षणानां
येनाक्रियन्त सततं गृहकुम्भदासाः ।
वाचामगोचरचरित्रपवित्रिताय
तस्मै नमो भगवते कुसुमायुधाय ॥१३॥

( कर्णं दत्त्वा ) कथं मञ्जीरझात्कारः ? । (विमृश्य ) न तावदेतस्यां नगरदवीयस्यां कुहरविहरमाणकरालव्यालभीष्मायामारामभूमौ दस्युप्रचारसमुचिते च निशीथसमये मनुष्यकामिनीसञ्चारः सम्भवति । तदनेन वनदेवताचरणमञ्जीररवेण भाव्यम् ।

(ततः प्रविशति पूजापटलहस्तचेटीदत्तहस्तावलम्बा कृपाणपाणिना पुरुषेणानुगम्यमाना सर्वाङ्गीणाभरणा युवतिः । )

**मकरन्दः** – (विलोक्य ) निश्चितमियं दीपज्योतिषा मामवलोक्य न किमपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वैरमाचरिष्यति, तदहं विध्याप्य प्रदीपं द्वाराजिररोहिणः सहकारस्य तले तिरोदधामि । ( तथा करोति )

**युवतिः** – [1]हला बंधुले ! किमज्ज विगयपईवुज्जोयं भयवओ गब्भहरं ? हीमाणहे ! कहं अंधयारे पूयं करिस्सं ? ।

**मकरन्दः** – किम् 'अद्य' इति ब्रुवाणा ध्रुवमियमन्यदा निशीथे समायाति ? ।

**पुरुषः** – भर्तृदारिके ! शतशो वासरेषु दृष्टपूर्वा ते भगवतः पञ्चबाणस्य प्रतिमा; ततो यथादृष्टस्मरणमवयवेषु विमुञ्च विकचविचकिलस्रजः ।

**युवतिः** –(सखेदम् ) [2]अज्ज ! सुहिदो सि तुमं, सुमरेसि सव्वं पि । अहं उण महादुक्खभारभिंभलमाणसा अप्पाणं पि न संभरामि । ता चिट्ठंदु पूओवगरणाइं ।

**मकरन्दः** – ( साश्चर्यम् ) ईदृशेऽपि नेपथ्यप्रकारसंसूचिते महाविभवे महादुःखोपनिपातः !

> दरिद्रः क्षुत्पिपासाभ्यां विघ्ना-ऽऽधि-व्याधिभिर्धनी ।
> प्रायेण लोकः सर्वोऽपि शोकसङ्कुलमानसः ॥१४॥

**युवतिः** – ( सास्रं प्रणम्य ) [3]भयवं पंचबाण ! असरणस्स विहलरूवविहवस्स जणस्स सुणेहि विन्नत्तिं । एस चरमं विन्नवीयसि ।

**मकरन्दः** – (साशङ्कम् ) 'अशरण' इति ब्रुवाणा निष्प्रतीकारमपायमात्मनः सूचयति; 'चरमम्' इति च प्राणपरित्यागपिशुनं वचः ।

**युवतिः** –

> [4]अणवरयं पूआहिं तुट्ठो सि कहं पि जइ महं देव ! ।
> रक्खिज्जसु ता मज्झं तरेवि एयारिसमणत्थं ॥१५॥

**मकरन्दः** – कः पुनरसावनर्थः ? यत्र प्राणपरित्यागोऽपि प्रियङ्करः ।

**चेटीः** – [5]भट्टिदारिए ! केरिसा तुज्झ एरिसा निव्वेयगब्भिणी विन्नत्ती ? समीहिदं किं पि मंगलं पत्थेसु ।

---

१ सखि बन्धुले ! किमद्य विगतप्रदीपोद्योतं भगवतो गर्भगृहम् ? अहो कष्टं कथमन्धकारे पूजां करिष्यामि ? ।

२ आर्य ! सुखितोऽसि त्वम् , स्मरसि सर्वमपि । अहं पुनः महादुःखभारविह्वलमानसा आत्मानमपि न स्मरामि । तत् तिष्ठन्तु पूजोपकरणानि ।

३ भगवन् पञ्चबाण ! अशरणस्य विफलरूपविभवस्य जनस्य शृणु विज्ञप्तिम् , एष चरमं विज्ञप्यसे ।

४ अनवरतं पूजाभिः तुष्टोऽसि कथमपि यदि मह्यं देव !। रक्षेः तद् मां दत्त्वा एतादृशमनर्थम् ॥

५ भर्तृदारिके ! कीदृशी तव ईदृशी निर्वेदगर्भिणी विज्ञप्तिः ? समीहितं किमपि मङ्गलं प्रार्थय ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**युवतिः** – [1]एदं ज्जेव दाणि मे समीहिदं मंगलं।

**मकरन्दः** – समीचीनमाह दुःखितेयं युवतिः।

**इदं कृत्यमकृत्यं वा काल-देशाद्यपेक्षया।**
**परासोरात्मजस्यापि दहनं मङ्गलक्रिया ॥१६॥**

**युवतिः** – (सखेदम्)

**[2]दुत्था परव्वसा वाहिया य अंधा य पियविउत्ता य।**
**कह नाम लहिज्ज सुहं? न हुज्ज भयवं जइ कयंतो ॥१७॥**

**पुरुषः**– भर्तृदारिके! इदानीमनर्थसंसूचिका काऽपि ते मनोवृत्तिः। तदुत्तिष्ठ व्रजामः सौधम्। उपनयामि त्वां माता-पितृभ्याम्, तयोरन्तिके यदुचितं तद् विदध्याः।

**युवतिः** – (सावहित्थं विहस्य) [3]अज्ज! सव्वओ वि भीरुआहिं अम्हारिसाहिं विलयाहिं किं पि अणत्थं कीरदि?, ता किं अलीयसंभावणाहिं अत्ताणयं किलेसेसि?; वच्च, आणेसु कुदो वि पईवं। बंधुले! तुमं पि आणेसु दीहियाओ कमलाइं, जेण मम्महं पूएमि।

(उभौ निष्क्रान्तौ)

**मकरन्दः** – एतौ ध्रुवमेतया कपटेन बहिः प्रवासितौ, तदहं सावधानो भवामि। अपि नामेयमाततायिनी किमप्यवाच्यमाचरेत्।

**युवतिः** – (सहकारमूलमागत्य) [4]भयवं अणंग! पडिवासरमाराहिएण वि तुमए न किं पि मे कदं पडिकयं। ता इयाणिं असरिसं साहसं कुणंतीए सक्खी वि दाव हविज्जासु।

(सहकारशाखायां कण्ठपाशमाबध्नाति।)

**मकरन्दः** – (तारस्वरम्) हंहो पुरुष! हंहो पुरुष!, हला बन्धुले! हला

---

१ एतद् एव इदानीं मे समीहितं मङ्गलम्।

२ दुःस्थाः परवशा व्याधिताश्च अन्धाश्च प्रियवियुक्ताश्च।
कथं नाम लभेत सुखं? न भवेद् भगवान् यदि कृतान्तः॥

३ आर्य! सर्वतोऽपि भीरुकाभिः अस्मादृशीभिः वनिताभिः कोऽपि अनर्थः क्रियते? तत् किं अलीकसम्भावनाभिः आत्मानं क्लेशयसि? व्रज, आनय कुतोऽपि प्रदीपम्। बन्धुले! त्वमपि आनय दीर्घिकातः कमलानि, येन मन्मथं पूजयामि।

४ भगवन् अनङ्ग! प्रतिवासरमाराधितेनापि त्वया न किमपि मे कृतं प्रतिकृतम्, तद् इदानीं असदृशं साहसं कुर्वत्याः साक्षी अपि तावद् भवेः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बन्धुले! एषा युवयोः स्वामिनी विपद्यते** (—इति ब्रुवाणोऽसिलतया कण्ठपाशं छिनत्ति।)

(युवतिर्मूर्च्छिता पतति, मकरन्दः वस्त्राञ्चलेनोपवीज्य हृदयं संवाहयति । ततः प्रविशति सम्भ्रान्तः सचेटीकः पुरुषः ।)

**पुरुषः**— (निभृतमालोक्य) **कथं भर्तृदारिकाया वक्षसि विहितासनस्तस्करः कोऽपि नेपथ्यमाकर्षति ? भवतु, कृपाणेन मूर्धानमेतस्यापनयामि ।** (पुनर्विमृश्य) **कथमन्धकारप्राग्भारेण स्त्री-पुंसयोर्विभागः कोऽपि लक्ष्यते ? ।**

**चेटी**—[1]**ताय! मुंच मुंच सामिणिं, देहि मे पाणभिक्खं, गिण्ह आहरणाइं ।**

**मकरन्दः**—(उभौ प्रति) **अ[न]वगतपरमार्थौ युवां व्याहरतः । नाहं चौरो जारो वा ।**

**पुरुषः**—**तर्हि किमेतत् ? कथय ।**

**युवतिः**—(चेतनामास्थाय स्वगतम्) [2]**एस को वि आहरणलोहेण मह जीवियं अवहरिदुकामो तक्करो ।** (प्रकाशम्) **महाभाय ! गिण्ह एयाणि मे आहरणाइं । अण्णं पि दे दविणजायं बहुयरमुवणयस्सं । करेहि एयाए असिधेणुआए कंठवीढम्मि जीविदेसकम्मं, जेण दुक्खमुक्खो होदि ।**

**मकरन्दः**—**भवतु, करिष्यामि कण्ठपीठे जीवितेशकर्म; किन्तु भुजपञ्जरपाशेन, न पुनरसिधेनुकया ।**

**बन्धुला**—[3]**महाभाय ! पसीय[दु] भयवं मम्महो । एदाए असंघडियाणुरूवजीविदेसाए सह भट्टिदारियाए भोदु दे एदं जंपियं पमाणं ।**

**मकरन्दः**—(पुरुषं प्रति)

**विधातुं सम्पदो हर्तुमापदश्च न निश्चयः ।**
**मनस्तु मे सदाऽप्यन्यदुःखसङ्क्रान्तिदर्पणः ॥१८॥**

**तत् कथय केनानर्थजातेन विह्वलीकृतेयं कण्ठपाशवैशसं कृतवती ? ।**

**पुरुषः**—**महाभाग ! यद्यप्यन्धकारे न कोऽप्याकारस्तवोपलक्ष्यते तथाप्यमुना कण्ठपाशच्छेदव्यापारेण महत्त्वशंसिना व्याहारेण ज्ञातमन्यदुःखसङ्क्रान्ति-**

---

१ तात ! मुञ्च मुञ्च स्वामिनीम्, देहि मे प्राणभिक्षाम्, गृहाण आभरणानि ।

२ एष कोऽपि आभरणलोभेन मम जीवितं अपहर्तुकामः तस्करः । महाभाग ! गृहाण एतानि मे आभरणानि । अन्यद् अपि ते द्रविणजातं बहुतरमुपनेष्यामि । कुरु एतया असिधेन्वा कण्ठपीठे जीवितेशकर्म, येन दुःखमोक्षो भवति ।

३ महाभाग ! प्रसीद[तु] भगवान् मन्मथः । एतया असङ्घटितानुरूपजीवितेशया सह भर्तृदारिकया भवतु ते एतद् जल्पितं प्रमाणम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्पणस्ते हृदयम् । अनर्थं पुनरिममेतस्याः पितरावेव परमार्थेनावगच्छतः । ततः किं तुभ्यमावेदयामि ? ।

**मकरन्दः** –(युवतीं प्रति)

**पृच्छन्नसंस्तुतो गोप्यमशक्तः कोपमावहन् ।**
**विरक्तां च स्त्रियं गच्छन् हास्यं कस्मै न यच्छति? ॥१९॥**

तथापि चिरसंस्तुतमिव मे भवत्यामन्तःकरणं न किमपि कृत्याकृत्यमालोचयति । ततो यदि समुचितं तदा प्रकाशय व्यसनमात्मनः, विगणय मामात्मीयम् । यदि च विज्ञातव्यसनहेतुरहं न प्रतीकारप्रयत्नमादधामि तदानीमसारवादिनमकुलीनं च जानीयाः ।

**युवतिः** – (स्वगतम्) [1]ममावि एदम्मि केणावि कारणेण परमपिम्मभिंभलं हिययं, ता कहेमि वसणं । भोदु दाव । (प्रकाशम्)

**सामत्थाभावेणं अकएसु पओयणेसु को रोसो ? ।**
**वसहेसु दुद्धमहियं नएसु को नाम निव्वेओ ? ॥२०॥**

**मकरन्दः** – (साक्षेपम्) कथं पुनर्व्यसननिवृत्तावस्माकं सामर्थ्याभावमवगच्छसि ? ।

**युवतिः** –[2]अत्तणो अप्पडियारेण वसणेणं अवगच्छामि ।

**मकरन्दः** –भद्रे ! अनभिज्ञाऽसि महापुरुषव्यापाराणाम् । पणीकृतप्राणसम्पदां हि महौजसां किं नाम साध्यमसाध्यं वा ? ।

**पुरुषः** –महाभाग ! बाढमुपपन्नमभिहितवानसि । किमुत व्यसनमहार्णवनिमग्न इव मे भवानपि प्रतिभाति । कथमपरथा निर्जनप्रचारायामारामभूमौ निशीथसमये दस्युरिव निलीनस्तिष्ठसि ? ।

**मकरन्दः** –साधु विज्ञातवानसि, तथापि न त्वया व्यसनवृत्तान्तमहं प्रष्टव्यः ।

**सुखं प्रकाश्यते दौःस्थ्यं प्राच्यमारूढवैभवैः ।**
**आरूढदौःस्थ्यैर्दुःखे न प्राचीनं वैभवं पुनः ॥२१॥**

---

१ ममापि एतस्मिन् केनापि कारणेन परमप्रेमविह्वलं हृदयम् , तत् कथयामि व्यसनम् । भवतु तावत् ।

सामर्थ्याभावेन अकृतेषु प्रयोजनेषु को रोषः ? ।
वृषभेषु दुग्धम् अहितं नयेषु को नाम निर्वेदः ? ॥

२ आत्मनः अप्रतीकारेण व्यसनेन अवगच्छामि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि पुनर्भगवान् विधिरनुकूलतां यास्यति कदाचित् [तदा] तव भर्तृ[दारि]-कायाः पुरः सर्वमावेदयिष्यामि ।

बन्धुला–[1]भट्टिदारिए ! अदिकालो भोदि, निवेदेहि वसणमेदस्स महाणुभावस्स ।

युवतिः–बन्धुले !

[2]विउलस्स वि उवयारस्स पुरिससीहस्स दड्ढमहिलाओ ।
पच्चुवयारं मन्नंति देहदाणाओ न हु अहियं ॥२२॥

बन्धुला–[3]तदो किं ? ।

युवतिः–[4]अहं दाणि देहदाणं पि काउमसमत्था, तदा कथं वसणं पयासेमि ? कहं च एदाओ वसणपडियारमहिलसेमि ? ।

पुरुषः–भर्तृदारिके ! प्रत्युपकारानपेक्षमुपकारकत्वमेतस्य महौजसः; ततो मा शङ्किष्ठाः, प्रकाशय व्यसनम् ।

युवतिः–(मकरन्दं प्रति) [5]पगासयामि वसणं, पढमं पुणो एदं सुणेसु ।

मकरन्दः–(सहर्षं समीपतरीभूय) किं तत् ? ।

युवतिः–[6]विग्घबहुलाओ रयणीओ, असमत्ते वि कहापबंधे विहडणावाओ को वि संभवे ।

मकरन्दः–(साक्षेपम्) ततः किम् ? ।

युवतिः–[7]तदो आरामसंघडणाहिन्नाणं गिहाण मे एदं कुंडलजुयलं ।

मकरन्दः– (सप्रमोदमात्मगतम्) कथमस्मत्प्राणसम्पदां ग्रहणसत्यङ्कारमियमुपनयति ? । (प्रकाशम्) भद्रे ! को नाम प्रियजनस्य प्रसादं नाभिमन्यते ? ।

---

१ भर्तृदारिके ! अतिकालो भवति, निवेदय व्यसनमेतस्य महानुभावस्य ।

२ विपुलस्य अपि उपकारस्य पुरुषसिंहस्य दग्धमहिलाः ।
प्रत्युपकारं मन्यन्ते देहदानाद् न हि अधिकम् ॥

३ ततः किम् ? ।

४ अहं इदानीं देहदानं अपि कर्तुमसमर्था, ततः कथं व्यसनं प्रकाशयामि ? कथं च एतस्माद् व्यसनप्रतीकारमभिलषामि ? ।

५ प्रकाशयामि व्यसनम् , प्रथमं पुनः एतद् शृणु ।

६ विघ्नबहुला रजन्यः, असमाप्तेऽपि कथाप्रबन्धे विघटनापायः कोऽपि सम्भवेत् ।

७ ततः आरामसङ्घटनाभिज्ञानं गृहाण मे एतत् कुण्डलयुगलम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

( युवती कुण्डलयुगलमर्पयति । )

**पुरुषः** –( सभयमात्मगतम् ) प्रातरेतस्याः पिता प्रसाधनसंख्यां मयि गवे[षि]-ष्यते, ततः कोऽयमनर्थः ? ।

**बन्धुला** –( सभयं स्वगतम् ) [1]किं मए पभाए भट्टिणीए पुरओ उत्तरं कायव्वं ? ।

**पुरुषः** –( सरोषम् ) भर्तृदारिके ! केयं स्वेच्छाचारिता? किमिदं वणिक्कुमारिकाचारविरुद्धं परपुरुषाय कुण्डलप्रदानम् ?; तदहं पदातिलोकमानीय कुण्डलमादास्ये । ( –इत्यभिधाय निष्क्रान्तः । )

**बन्धुला** –[2]भट्टिदारिए ! सव्वं पि एदम्मि दुट्ठे संभावीयदि, ता लहुं कहेसु वसणं ।

( नेपथ्ये )

एषा तस्य पदपद्धतिरुपवनं प्रविशति । ततः प्रदीपज्योतिषा मध्यमवलोकयत ।

( सर्वे सभयमाकर्णयन्ति )

**बन्धुला** –[3]भट्टिदारिए ! एदस्स दुट्ठस्स एदं वियंभियं ।

**मकरन्दः** –( स्वगतम् ) निश्चितं ममानुपदं कितवाः समायाताः । न चात्र मे प्रतिभयम् । सूत्रधाराभिहितोपश्रुतिश्लोकानुसारेण शुभोदर्कोऽयं ममोपवनप्रवेशः ।

**युवतिः** – [4]अज्ज ! किं मए दाणि कादव्वं ? ।

**मकरन्दः** – व्रज त्वमुपवनपाश्चात्यद्वारेण स्वभवनम् । पुनरहं प्रात(? श्व)-स्त्वया निशीथेऽत्र गवेषणीयः ।

( युवतिः सबन्धुला निष्क्रान्ता । )

**मकरन्दः** –कथं मां दीपज्योतिषा दृष्टवन्तः कितवाः ? । भवतु, कामायतनपाश्चात्यभागे तिरोदधामि !

( इति निष्क्रान्ताः सर्वे । )

**॥ प्रथमोऽङ्कः ॥ १ ॥ श्रीः ॥**

---

१ किं मया प्रभाते भर्त्र्याः पुरतः उत्तरं कर्त्तव्यम् ।

२ भर्तृदारिके ! सर्वमपि एतस्मिन् दुष्टे सम्भाव्यते, तद् लघु कथय व्यसनम् ।

३ भर्तृदारिके ! एतस्य दुष्टस्य एतद् विजृम्भितम् ।

४ आर्य ! किं मया इदानीं कर्तव्यम् ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# द्वितीयोऽङ्कः ।

( ततः प्रविशति चेटी । )

[ चेटी – ]

[1]तं किं पि कामिणीणं कत्थ वि पिम्मं जणम्मि निव्वडइ ।
झिज्जंति जेण डज्झंति जेण जेणं विवज्जंति ॥१॥

( प्रविश्य )

कोरकः – लवङ्गिके ! किमद्य विषादिनीव दृश्यसे ? ।

चेटी –[2]महाभाय ! किं कधयामि मंदभाइणी ? । अज्जं खु दाहजराभिभूदाए भट्टिदारियाए अट्ठमं दिणं वट्टदि । सा खु न जंपदि, न कीलदि, न भुंजदि, णवरं हत्थग्गविइन्नकवोलमूला [ चिट्ठदि ] ।

[ कोरकः – ] किम् ? ।

चेटी –[3]पियजणस्स विरहो ।

कोरकः – अहो ! आश्चर्यम् । ईदृशेऽपि व्यसनोपनिपाते भर्तृदारिकाया विरहः ।

रोगेऽपि विप्रयोगेऽपि शोकेऽपि व्यसनेऽपि च ।
क्षुत्-पिपासा-स्मराः प्रायो विमुञ्चन्ति न देहिनम् ॥२॥

क्व पुनः प्रस्थिताऽसि ? ।

चेटी – [4]दाहोवसमणत्थं दीहियाओ कमलाइं आणेदुं ।

( –इत्यभिधाय निष्क्रान्ता । )

कोरकः –( परिक्रम्य उच्चैःस्वरम् ) भो भोः श्रेष्ठिनो ब्रह्मदत्तस्य परिजनाः ! दीनारपञ्चशतीप्रदानपूर्वकं भर्तृदारिकापहाररक्षणाय भ्रमयत सर्वतः पुरपथेषु पटहम् ।

---

१ तत् किमपि कामिनीनां कुत्रापि प्रेम जने सञ्जायते ।
क्षीयन्ते येन दह्यन्ते येन येन विपद्यन्ते ॥

२ महाभाग ! किं कथयामि मन्दभागिनी ? अद्य खलु दाहज्वराभिभूताया भर्तृदारिकाया अष्टमं दिनं वर्त्तते । सा खलु न जल्पति, न क्रीडति, न भुनक्ति, नवरं हस्ताग्रविदत्तकपोलमूला [ तिष्ठति ] ।

३ प्रियजनस्य विरहः ।

४ दाहोपशमनार्थं दीर्घिकातः कमलानि आनेतुम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( नेपथ्ये )

अमितः पुरपथेषु पटहः । प्रतिज्ञातं चैकेन कितवेन भर्तृदारिकापहाररक्षणम् ।

कोरकः —भवतु, तर्हि श्रेष्ठिने विज्ञापयामि । (—इति परिक्रामति । विलोक्य) किमयं श्रेष्ठी सधर्मचारिण्या बन्धुसुन्दर्या समं किमपि पर्यालोचयन्नस्ति ।

( ततः प्रविशति श्रेष्ठी बन्धुसुन्दरी च । )

श्रेष्ठी – प्रिये ! मास्म वृथा विषादमातथाः ।

श्रिया शक्त्या च साध्येऽर्थे सिद्ध्यभावे मनःक्लमः ।
उभाभ्यामप्यसाध्ये तु का नाम परिदेवना ? ॥३॥

तथापि सर्वस्वप्रदानेनापि पुत्रीरक्षणार्थं प्रयत्नमाधास्यामि ।

व्यसने महत्यपि समुल्लसिते निरुपायता खलु न युक्तिमती ।
जलधेरगाधमपि वारि नरः प्रविगाहते समधिरुह्य तरीम् ॥४॥

बन्धुमती –( सास्रम् ) [1]अज्जउत्त ! सव्वो वि एस बालकालादो वच्छापरिपालणापयासो विहलो भविस्सदि ।

श्रेष्ठी –प्रिये ! विधिनियोगोऽयमशक्यप्रतीकारो लोचने निमील्य सोढव्य एव ।

न स मन्त्रो न सा बुद्धिः न च दोष्णां पराक्रमः ।
अपुण्योपस्थितं येन व्यसनं प्रतिरुध्यते ॥५॥

कोरकः – आर्य ! सम्पन्नो रक्षकः ।

श्रेष्ठी – कः पुनः सम्पन्नः ? ।

कोरकः – कितवः कोऽपि ।

श्रेष्ठी – यदि कितवो रक्षकः, सम्पन्नं तर्हि प्रयोजनम् । व्यसनान्धा हि प्राणव्ययेनापि धनार्थं प्रयोजनं साधयन्ति । कः पुनस्तस्यात्रागमने कालविलम्बः ? ।

( प्रविश्य )

सुन्दरकः – आर्य ! रक्षकस्य द्यूतकारा राजाज्ञयाऽत्रागमनं निषेधयन्ति ।

श्रेष्ठी – ( साक्षेपम् ) अस्मत्प्रतिगृहीतस्य रक्षकस्य द्यूतकाराणामत्रागमनप्रतिषेधने शक्तिरस्ति ? ।

---

१ आर्यपुत्र ! सर्वोऽपि एष बालकालाद् वत्सापरिपालनाप्रयासः विफलो भविष्यति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुन्दरकः – अवश्यमस्ति ।

श्रेष्ठी – केन हेतुना ? ।

सुन्दरकः –उत्तमर्णत्वेन ।

श्रेष्ठी –( विहस्य ) सुन्दरक ! उपपन्नमभिहितवानसि । ( विमृश्य ) व्रज त्वम्, ऋणप्रदानमङ्गीकृत्य कितवैः सहाऽऽनय रक्षकम् ।

( सुन्दरो निष्क्रान्तः । )

( ततः प्रविशति पञ्चषैर्द्यूतकारैर्धृतो मकरन्दः । )

श्रेष्ठी –( विलोक्य स्वगतम् ) अहो ! आकारसौन्दर्यम्, अहो ! शरीरलक्षणानां प्रशस्तता, कटरि ! गतेः प्रागल्भ्यम् । ( पुनः सजुगुप्सम् ) सर्वेषामपि लक्षणानां दुरोदरव्यसनमन्तरायः । अथवा व्यसनान्धमेवेदं जगत् ।

केचिद् भोजनभङ्गिभिर्नरधियः केचित् पुरन्ध्रीपराः
केचिन्माल्यविलेपनैकरसिका गीतोत्सुकाः केचन ।
केऽपि द्यूतकथा-मृगव्य-मदिरा-ताम्बूल-शास्त्रोन्मुखाः
केचिद् वाजि-गजोक्षयान-सदना-ऽपत्या-ऽऽसनव्याकुलाः ॥६॥

भवतु । ( प्रकाशम् ) इदमासनमास्यताम् ।

( सर्वे मकरन्दं परिवृत्योपविशन्ति । )

श्रेष्ठी – ( विमृश्य द्यूतकारान् प्रति ) भवत क्षणमेकं दवीयांसो यूयम् ।

द्यूतकाराः –( साक्षेपम् ) अयमस्माभिरनङ्गभवनपृष्ठनिलीनो निशीथसमये महता प्रयासेन प्राप्तः । तदिदानीमस्मासु नेदीयोदेशस्थितेष्वेव सर्वमेतेन विधातव्यम्, भवद्भिर्विधापयितव्यं च ।

श्रेष्ठी – किमेतेन भवतां देयम् ? ।

द्यूतकाराः – दीनारपञ्चशतानि ।

श्रेष्ठी –अहो ! सदृशः कथासन्निवेशः । अस्माभिरप्येतावदेवास्य देयम् । ततो व्रजत यूयम्, प्रातर्वयं भवतामेनमर्पयामो देयं वा । यदि वा किमेतेन वणिजां समुचितेन कुटिलभणितेन ? । एतस्याकारदर्शनेनैव वयमावर्जिताः । प्रयोजनं यथा–तथा वाऽस्तु । देयमस्माभिर्भवतां प्रातर्देयमिति ।

द्यूतकाराः – श्रेष्ठिन् ! प्रमाणं वयम् ? । अङ्गीकृतो विधिः ?, व्रजामो वयम् ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**श्रेष्ठी** – अवश्यं ममाणम्, व्रजत यूयम् ।

(द्यूतकारा निष्क्रान्ताः ।)

**श्रेष्ठी** – किमभिधानो भवान् ? ।

**मकरन्दः** – मकरन्दाभिधानोऽस्मि ।

**श्रेष्ठी** – अवश्यमनुष्ठातव्यः प्रतिज्ञातोऽर्थः ? ।

**मकरन्दः** – कः सन्देहः ? ।

**श्रेष्ठी** –अस्ति मन्त्रजा शरीरजा वा काऽपि क्षुद्रोपद्रवद्राविणी शक्तिः ? ।

**मकरन्दः** – अस्य पर्यनुयोगस्य प्रयोजनसिद्धिरेव समाधानम् ।

**श्रेष्ठी** –( विमृश्य सकरुणम् ) महाभाग ! महापुरुषोचितां तामेतामाकृतिमनाकुलतां विनयसम्पत्तिं च विलोक्य तदेतस्मिन्नपायशतसङ्कीर्णे वच्छापरिहारनिवारणाकर्मणि न प्रभवामि भवन्तं व्यापारयितुम् । तदद्यापि विमृश प्रयोजनवैषम्यम्, विचिन्तय जीवितस्य सन्देहम्, विगणय धनस्य पांशुप्रायताम् । उत्तिष्ठ, प्रयाहि स्वं स्थानम् । अस्मदन्तिके व्यापारान्तरं किमप्यादधानः कालमतिवाहय ।

**बन्धुसुन्दरी** – [1]पुत्तया ! वच्च तुमं, जीव चिरं, मह वच्छाए जं विहिणा लिहियं तं भविस्सदि ।

**मकरन्दः** – नाहं तादृशो यादृशं यूयं विचिन्तयत, तत् किमर्थमपायसम्पातसन्दर्शनेन सन्त्रासयत माम् ? । अपि च–

**स्वीकृतापायसम्पातः सर्वां सिद्धिं विगाहते ।**
**युद्धे हि प्राणसापेक्षो विपक्षैः परिभूयते ॥७॥**

ततो विमुञ्च्य कातरतां प्रथयत सौष्ठवम् । कथयत किं मया विधेयम् ? कस्य विधेयम् ? कदा विधेयम् ? ।

( श्रेष्ठी बन्धुसुन्दर्या मुखमवलोकयति । )

**बन्धुसुन्दरी** – [2]महंतो एदस्स अवट्ठंभो, ता अणुट्ठीयदु समीहिदं ।

**श्रेष्ठी** –अस्मद्वच्छाया निशीथसमये देवतापहारनिवारणं त्वया विधेयम् । यावत् प्रयोजनं सन्निधीयते तावत् कथामेकामाकर्णय – इतः संवच्छराद् गते षोडशे वच्छरे प्रातरावश्यककरणाय गृहोपवनं गतोऽहम् ।

**मकरन्दः** – ततस्ततः ? ।

---

१ पुत्रक ! व्रज त्वम्, जीव चिरम्, मम वत्साया यद् विधिना लिखितं तद् भविष्यति ।

२ महान् एतस्य अवष्टम्भः, तद् अनुष्ठीयतां समीहितम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**श्रेष्ठी** –तदहर्जातां नामाङ्कितमहार्घ्याङ्गुलीयकप्रसाधितपाणिपल्लवां मसृणघुसृणरसलिखिताक्षरभूर्जकण्डकमण्डितसव्येतरकलाचिकां उत्फुल्लमल्लिकाविटपच्छायायां कन्यकामेकामद्राक्षम् ।

( सर्वे सविस्मयमाकर्णयन्ति । )

**मकरन्दः** – ततस्ततः ? ।

**श्रेष्ठी** –अत्यद्भुतप्रसूतप्रभूतप्रमोदमेदुरान्तःकरणश्चाहं 'किमेतत् ?' इति चमत्कारतिरोहितविधेयनिर्णयो निस्तरङ्गेण चक्षुषा क्षणमेकं तां वीक्षितवान् ।

**कोरकः** – ( सविनयम् ) ततस्ततः ? ।

**श्रेष्ठी**– अनन्तरं च महता प्रयत्नेन पाणिपल्लवाभ्यामादाय तामेतस्या बन्धुसुन्दर्याः समुपनीतवान् । मल्लिकाच्छायायां प्राप्तेति सा मल्लिकानाम्ना व्युपदिश्यते ।

**बन्धुसुन्दरी** –[१]देवदापसादं मन्नंदीए मए वि तणयाणिव्विसेसेणं वच्छल्लेणं इत्तयं कालं जाव परिपालिदा ।

**मकरन्दः** – (स्वगतम् ) निश्चितमियं दुराचारसञ्जातगर्भायाः कस्याश्चिद् विद्याधर्याः पुत्री । ( प्रकाशम् ) किंनामाङ्कितान्यङ्गुलीयकानि ? किमक्षरं च भूर्जकण्डकम् ?–इति ज्ञायते ? ।

**श्रेष्ठी** –ज्ञायते, निरूपयतु च भवानपि । ( अङ्गुलीयकानि भूर्जकण्डकं च समर्पयति । )

**मकरन्दः** –( अङ्गुलीयकान्यवलोक्य) कथं महाराजवैनतेयनामाङ्कितान्यङ्गुलीयकानि ? ।

( भूर्जकं च वाचयति । ) षोडशवर्षान्ते चैत्रकृष्णचतुर्दश्यां पुनरियं मया परिणेतारं रक्षितारं च व्यापाद्य प्रसभमपहर्त्तव्या ।

**मकरन्दः** –( सभयमात्मगतम् ) अनीषत्करं निवारणमस्मादृशैरेतस्या दिव्यकन्यकायाः । तथापि प्रतिज्ञापरित्यागस्त्रपामावहति । ( प्रकाशम् ) अङ्गुलीयक–भूर्जकण्डकावलोकनेन ज्ञातम् 'असुकरोऽयं विधिः' । तथाप्यस्ति मे मान्त्रिकी शक्तिः, ततो [न] भवद्भिः प्रयोजननिष्पत्तिसन्देहः कार्यः ।

**श्रेष्ठी** – भवदाकारदर्शनसमयेऽपि अस्माभिर्निर्णीतोऽयमर्थः ।

---

१ देवताप्रसादं मन्यमानया मयाऽपि तनयानिर्विशेषेण वात्सल्येन इयन्तं कालं यावत् परिपालिता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मकरन्दः** –( स्वगतम् ) महासाहसैकसाध्योऽयमर्थो न बाह्यमाडम्बरमपेक्षते। तथापि तदवश्यमाधेयम् ।

पयांसि भूरुहां हेतुर्न पुनर्गर्जितारवः ।
माघे तथापि गर्जन्ति क्षोभाय जनचेतसाम् ॥८॥

( प्रकाशम् ) आर्य !

अनादिसिद्धे मीमांसा विश्ववर्त्मनि का सताम् ? ।
रूपजीवाः स्त्रियः सृष्टाः पुमांसो न पुनः कथम् ? ॥९॥

**श्रेष्ठी** – प्रस्तुतमभिधीयताम् ।

**मकरन्दः** –प्रस्तुतमिदम्–'मन्त्रमण्डलपूजापूर्वकं सर्वमनुष्ठानम्' इति भवतामपि प्रसिद्धम्। अतो मण्डलोपकरणेषु विचारो नः कर्त्तव्यः ।

**श्रेष्ठी** –अवश्यं कर्त्तव्यः ।

**मकरन्दः** –तर्हि समानयत सद्यःप्रसूतव्याघ्रीक्षीरम्, सम्पादयत विन्ध्यचमरीशृङ्गगोरोचनाम्, ढौकयत वानेयगजप्रथमदानवारि ।

**श्रेष्ठी** – अवशिष्यते किमपि ? ।

**मकरन्दः** –अवशिष्यते षोडशवर्षदेशीयखल्वाटपुरुषचितावह्निः ।

**श्रेष्ठी** –( शिरो धूनयित्वा ) असुकरसङ्क[ट]नः सर्वोऽप्युपकरणप्रपञ्चः, विशेषतो वह्निरयम्। भवतु, कोऽत्र भोः ! ? ।

( प्रविश्य )

**सुन्दरकः** – एषोऽस्मि ।

( श्रेष्ठी सुन्दरस्य कर्णे एवमेव )

( सुन्दरो निष्क्रान्तः । )

**श्रेष्ठी** –यावदुपकरणानि सन्निधीयन्ते तावदागच्छत यूयं वत्छाया मल्लिकायाः समीपम्। हला लवङ्गिके ! गत्वा ब्रूहि वत्साम्–समयोऽयमस्मदागमनस्य।

( नेपथ्ये )

[1]समओ वट्टदि ता एदु तादो ।

( सर्वे गृहोपवनमुपविशन्ति । )

( ततः प्रविशति विरहावस्थां नाटयन्ती मल्लिका लवङ्गिकाप्रभृतिकश्च परिवारः । )

---

१ समयो वर्त्तते तद् एतु तातः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मल्लिका** –[1]हला लवंगिके ! अवणेहि वच्छत्थलादो नलिणीवत्ताइं, करेहि सट्ठाणेसु मे निवसणाइं । देहि मे हत्थावलंबणं जेण अंबाए तादस्स य अब्भुट्ठाणं करेमि ।

**श्रेष्ठी** –वत्से ! पर्यङ्कस्थिता यथासुखमास्स्व । मास्माभ्युत्थाने क्लेशमातथाः । ( मकरन्दं प्रति, अपरं प्रति ) दाहज्वरेण सर्वाङ्गीणमभिभूतायास्तदेतदष्टमं दिनं वत्साया एतस्याः ।

**मकरन्दः** – ( स्वगतम् )

**केयूराणि मृणालजानि कुचयोः श्रीषण्डवारिच्छटाः**
**शय्या बालसरोजिनीदलमयी हारोऽपि रम्भोद्भवः ।**
**अङ्गं सान्द्रजलार्द्रमङ्गणभुवो मल्लीवितानाश्रिता**
**वेषः सैष वियोगरोगविषमामस्या दशां शंसति ॥१०॥**

माता-पितरौ पुनरपहारदुःखमावेदयतः । तत् किमिदं परस्परविरुद्धम् ? ।

**मल्लिका** – ( मकरन्दमवलोक्य स्वगतम् )

**[2]एदस्स देहलट्ठिं काउं विहिणा विरम्मिया विरई ।**
**इहरा कह कस्स वि नत्थि इत्थ एयारिसं रूवं ? ॥११॥**

( पुनः सस्पृहम् )

**[3]जइ कह वि रई पिच्छिज्ज एयमसरिससरीरसुंदेरं ।**
**सिढिलीकरिज्ज ता तम्मि पिम्मगंठिं अणंगम्मि ॥१२॥**

[4]अहवा—

**ववसाओ च्चिय पुरिसाणमणुवमो मंडणं सरीरस्स ।**
**रूवं पि पुणो जइ हुज्ज ता जियं हरिणनयणाहिं ॥१३॥**

---

१ हला लवङ्गिके ! अपनय वक्षःस्थलाद् नलिनीपत्राणि, कुरु स्वस्थानेषु मे निवसनानि । देहि मे हस्तावलम्बनं येन अम्बायाः तातस्य च अभ्युत्थानं करोमि ।

२ एतस्य देहयष्टिं कृत्वा विधिना विरचिता विरतिः ।
इतरथा कथं कस्यापि नास्ति अत्र एतादृशं रूपम् ? ॥ ११ ॥

३ यदि कथमपि रतिः प्रेक्षेत एतमसदृशशरीरसौन्दर्यम् ।
शिथिलीकुर्यात् तत् तस्मिन् प्रेमग्रन्थिं अनङ्गे ॥ १२ ॥

४ अथवा–
व्यवसाय एव पुरुषाणामनुपमो मण्डनं शरीरस्य ।
रूपमपि पुनः यदि भवेत् तद् जितं हरिणनयनाभिः ॥ १३ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मकरन्दः** – ( सस्पृहम् )

चक्षुर्बाष्पविकज्जलं करतलन्यासङ्गखण्डद्युति-
गण्डश्रीरधरः खरः प्रसृमरैः सूत्कारतारोर्मिभिः ।
आहारप्रतिरोधकीकससिरामात्रा च गात्रावनि-
र्दृष्टिं प्रीणयते तथापि सुदती लेखेव शीतत्विषः ॥१४॥

**मल्लिका** – ( स्वगतम् ) [1]अम्मो !, उववणदिट्ठपुरिसपिम्मकीलिदं पि मे हिदयं कधं पुणो पुणो एदम्मि वच्चदि ? । अवि य एस किल लोयाणं पवादो–

अन्नत्थ रागिणीओ रच्चंति न वम्महे वि महिलाओ ।
रुच्चइ न णाम राया वि तवणरत्ताण नलिणीणं ॥१५॥

सो उण मइं दाणि विवरीदो जादो ।

**बन्धुसुन्दरी** –[2]वच्छे ! सत्था होहि । एस दे सव्वं पि सरीरवियणं दाहज्जरं च अवणइस्सदि ।

**श्रेष्ठी** – प्रिये !अत्यल्पमभिदधासि, देवतापहारमप्येष वत्साया अपनेष्यते ।

**मल्लिका** – ( साक्षेपम् ) [3]ताद ! एदेणं ज्जेव अवहरिदा । किं देवदा अवहरिस्सदि ? ।

**बन्धुसुन्दरी** – ( साशङ्कम् ) [4]अज्जउत्त ! किं एसा ईदिसं लज्जायरं जंपदि ? ।

**श्रेष्ठी** – प्रिये ! मा भैषीः, दाहज्वराभिभवेनात्स्वप्नायितमिदम् ।

**बन्धुसुन्दरी** – ( सदैन्यम् ) [5]पुत्तया ! एसा मह धूया तुमं समप्पिदा, तहा कहं करेहि जहा निव्वुइं लहइ ।

---

१ आश्चर्यम्,
उपवनदृष्टपुरुषप्रेमकीलितमपि मे हृदयं कथं पुनः पुनः एतस्मिन् व्रजति ? ।
अपि च एष किल लोकानां प्रवादः –
अन्यत्र रागिण्यः रज्यन्ते न मन्मथेऽपि महिलाः ।
रोचते न नाम राजाऽपि तपनरक्ताभ्यो नलिनीभ्यः ॥ १५ ॥
स पुनः मम इदानीं विपरीतो जातः ।

२ वत्से ! स्वस्था भव, एष ते सर्वामपि शरीरवेदनां दाहज्वरं च अपनेष्यते ।

३ तात ! एतेन एव अपहृता । किं देवता अपहरिष्यति ? ।

४ आर्यपुत्र ! किं एषा ईदृशं लज्जाकरं जल्पति ? ।

५ पुत्रक ! एषा मम पुत्री तुभ्यं समर्पिता, तथा कथं कुरु यथा निर्वृतिं लभते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मकरन्दः** –(स्वगतम्) न केवलं त्वया, अनयाऽप्यात्मा मे समर्पितः। (पुनः सविषादम्) धिग् मां कृतघ्नम्, नन्वहमुपवनदृष्टया युवत्या सत्यङ्कारितः कथमेतां स्पृहयामि ?। (प्रकाशम्) अम्ब ! सर्वमप्यहमाधास्ये यदि मण्डलोपकरणानि सन्निधास्यन्ते ।

**बन्धुसुन्दरी** – [1]हला बंधुले ! किं अज्ज वि न सुंदरओ समागच्छदि ?।

**मकरन्दः** – (साशङ्कमात्मगतम् ?) बन्धुलेति शब्दः श्रुतपूर्वः, स्वरोऽप्ययं मल्लिकायास्तादृशो यादृशस्तस्या विपिनयोषितः। ततो यदि सैवेयं तदा सम्मुखीनः स भगवान् विरञ्चिः। प्रयोजनं चैतदात्मीयमेव। (पुनः साभिलाषं मल्लिकामवलोक्य स्वगतम्)

चलकमलविलासाभ्यासिनी नेत्रपत्रे
दश[न]वसनभूमिर्बन्धुजीवं दुनोति ।
स्मरभरपरिरोहत्पाण्डिमागूढरूढ-
द्युतिविजितमृगाङ्का मोदते गण्डभित्तिः ॥ १६ ॥

(प्रविश्य सुन्दरक उपकरणान्युपनयति।)

**मकरन्दः** –उपविशतु निवसितसदशैकवसनाङ्गी मल्लिका, येन पुरो मण्डलमारभ्यते ।

**मल्लिका** – (सात्त्विकभावान् नाटयन्ती) [2]अंब ! देहि मे हत्थावलंबणं जेण उट्ठेमि ।

**बन्धुसुन्दरी** – (मकरन्दं प्रति) [3]पुत्तया ! एदाए पुरदो वि तुमं हत्थावलंबणं, तं दाणिं पि होहि ।

(मकरन्दः सरोमाञ्चं मल्लिकामुत्थाप्य पूर्वाभिमुखीमुपवेशयति।)

**मल्लिका** – (स्वगतम्) [4]तादिसो एदस्स हत्थप्फंसो जादिसो मह हिययं संवाहयंतस्स उववणपुरिसस्स। साहसं पि तादिसं ज्जेव। ता किं नेदं ?।

**मकरन्दः** – (मण्डलमाधाय स्वगतम्)

---

१ हला बन्धुले ! किं अद्यापि न सुन्दरकः समागच्छति ? ।

२ अम्ब ! देहि मे हस्तावलम्बनं येन उत्तिष्ठामि ।

३ पुत्रक ! एतस्याः पुरतोऽपि त्वं हस्तावलम्बनम्, तदिदानीमपि भव ।

४ तादृश एतस्य हस्तस्पर्शः यादृशः मम हृदयं संवाहयतः उपवनपुरुषस्य। साहसमपि तादृशमेव । तत् किं नु इदम् ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृत्रिमैर्डम्बरैर्बाह्यः शक्यस्तोषयितुं जनः ।
आत्मा तु वास्तवैरेव हृतोऽयं परितुष्यति ॥ १७ ॥

तदयं बाह्यो लोकः साहसं यादृशं तादृशं वा मयि सम्भावयतु, मम पुनरात्माऽपि दुःखरक्षणीयः । तदेतस्मिन्नवसरेऽहं पञ्चपरमेष्ठिनमस्कारस्मरणेनाऽऽत्मनो रक्षां करोमि । ( प्रकाशम् ) आर्य ! मण्डलधूपार्थमुपनयत निर्गुण्डिकापत्राणि यावदहं ध्यानमादधे । ( ध्यानं नाटयति । )

( प्रविश्य बन्धुला निर्गुण्डीपत्राण्युपनयति । मकरन्दः क्षणेन मण्डलं प्रणम्य कुण्डलाभ्यां पूजयति । सर्वे सविस्मयमालोकयन्ति । )

**श्रेष्ठी** – ( अपवार्य ) सुन्दरक ! किमिदम् ? ।

**सुन्दरकः** – तदेवेदम्, यन्मया विपिनादागतेन युष्मभ्यमावेदितम् ।

**श्रेष्ठी** – सम्भवति कितवस्य चौर्यकर्म ।

**कोरकः** – ( अपवार्य ) आर्य ! महतः कर्मणः साम्प्रतमारम्भाः, तदधुना न किमपि वक्तव्यम् ।

अपराधोऽपि सोढव्यो वाञ्छितार्थविधायिनः ।
दहन्नप्यग्निना तुन्दं गुल्मिभिः पूज्यते भिषक् ॥ १८ ॥

**मल्लिका** – ( अपवार्य ) [1]बन्धुले ! दिट्ठं किं पि तुमए ? ।

**बन्धुला** – [2]तं दिट्ठं जं मणोरहेहिं पि न दिट्ठं ।

**मल्लिका** – [3]ता जीयंति मल्लियाए भागहेयाइं ।

**श्रेष्ठी** – ( अपवार्य बन्धुसुन्दरीं प्रति ) प्रिये ! उत्तिष्ठ, सार्धं व्रजामः । वयमेवानयोर्मल्लिका-मकरन्दयोर्बाह्याः ।

**बन्धुसुन्दरी** – [4]अज्जउत्त ! जं तुवं भणासि तं सच्चं, पुरवं पि बंधुलाए ईदिसं किं पि मह कहिदं ।

**मकरन्दः** – रजनिरिदानीम्, अपसरतु बाह्यो लोकः । मल्लिकाभागधेयैरस्माभिश्चात्र स्थातव्यम् ।

( मल्लिका-मकरन्दवर्जं सर्वे निष्क्रान्ताः । )

---

१ बन्धुले ! दृष्टं किमपि त्वया ? ।
२ तद् दृष्टं यद् मनोरथैरपि न दृष्टम् ।
३ तद् जीवन्ति मल्लिकाया भागधेयानि ।
४ आर्यपुत्र ! यत् त्वं भणसि तत् सत्यम्, पूर्वमपि बन्धुलया ईदृशं किमपि मम कथितम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मल्लिका** – [1]भद्द ! कुदो दे कुंडलसंपत्ती ? ।

**मकरन्दः** – यतो भवती बन्धुला च जानाति ।

**मल्लिका** – [2]अज्जउत्त ! मए कुंडलच्छलेण अप्पा तुह समप्पिदो ।

**मकरन्दः** – कुण्डलच्छलेन त्वयाऽऽत्मा मह्यं समर्पितः, मया तु छलं विनाऽपि तुभ्यम् ।

**मल्लिका** – [3]अज्जउत्त ! सुणेहि मे एगं पइन्नं–अहं तुमं परिणेमि, कुमारी वा चिट्ठामि ।

**मकरन्दः** – ( साक्षेपम् ) सहस्रशो विज्ञातस्यार्थस्य किं फलम् ? ।

**मल्लिकाः** – [4]एदं फलं, जधा पुणो पुणो मे दाणि दाहिणं नयणं पडिफुरदि तधा जाणे अवस्सं अवहारेण भोदव्वं, तदो तए जीविदपवासकरणं अवहरणनिब्बंधो [ वा ] न कायव्वो ।

**मकरन्दः** – ( साक्षेपम् ) प्रिये ! किमिदमनुचितमभिदधासि ? ।

**हतस्य जीवितस्यास्य निश्चयेन प्रवासिता ।**
**प्रवासश्चेत् प्रियस्यार्थे ततः किं नाम वैशसम् ? ॥ १९ ॥**

**मल्लिका** – [5]अज्जउत्त ! करेहि मे पसादं, एस दे पुरओ निबद्धो अंजली, सिढिलेहि साहसं, जीवंताणं पुणो वि संगमो भविस्सदि ।

( नेपथ्ये नूपुरध्वनिः । मल्लिका आकर्ण्य वेपते । मकरन्दः पञ्चपरमेष्ठिनमस्कारयन्नसिदण्डमाकर्षति । )

( नेपथ्ये )

अरे ! कस्त्वमसि रक्षिता परिणेता वा ? ।

**मकरन्दः** – अहं परिणेता रक्षिता च ।

( नेपथ्ये )

अहो ! आश्चर्यम् ,विद्याधरकन्यकाया मनुष्यकीटः परिणेता रक्षिता च ।

---

१ भद्र ! कुतः ते कुण्डलसम्प्राप्तिः ? ।

२ आर्यपुत्र ! मया कुण्डलच्छलेन आत्मा तुभ्यं समर्पितः ।

३ आर्यपुत्र ! शृणु मे एकां प्रतिज्ञाम् – अहं त्वां परिणयामि, कुमारी वा तिष्ठामि ।

४ एतत् फलम् , यथा पुनः पुनः मे इदानीं दक्षिणं नयनं प्रतिस्फुरति तथा जानामि–अवश्यं अपहारेण भवितव्यम् , ततस्त्वया जीवितप्रवासकरणं अपहरणनिर्बन्धो [ वा ] न कर्त्तव्यः ।

५ आर्यपुत्र ! कुरु मयि प्रसादम् , एष ते पुरतः निबद्धः अञ्जलिः, शिथिलय साहसम्, जीवतोः पुनरपि सङ्गमो भविष्यति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मकरन्दः – किमाश्चर्यम् ?

यावत् कुरङ्गनेत्रा तरुणी तरुणस्य दास्यमाधत्ते ।
वृद्धोऽपि तावदिच्छति न वीक्षयते योग्यतामिच्छा ॥ २० ॥

अपि च–

पृथिव्यां वीरभोग्यायां लक्ष्म्यां चापल्यसंस्पृशि ।
स्त्रियां चाशंक्यरक्षायां कस्य किं नाम नोषितम् ? ॥ २१ ॥

( नेपथ्ये )

तर्हि प्रयत्नमादधीथाः, इयमेतामपहरामि । वत्से ! मास्म विषादिनी भूः । एहि त्वरिततरम्, त्वामहं विद्याधरराजमहिषीमाधास्यामि ।

मल्लिका – [1]हा अज्जउत्त ! हा ताद ! हा अंब ! एसा असरणा केणावि अवहरिज्जामि । ( इति प्रलपन्ती तिरोधत्ते । )

मकरन्दः – कथमपहृता प्रिया ? हा प्रिये मल्लिके ! त्वदपहारदुःखसाक्षी पापीयान् । ( मूर्च्छति । पुनश्चेतनामास्थाय ) कथमहं दुरात्मा भग्नप्रतिज्ञः स्वमास्यं मल्लिकामातापित्रोर्दर्शयामि ? । तदनेनैवोपवनपाश्चात्यद्वारेण निर्गत्य प्रियाप्रेमोचितमादधामि । ( इति निष्क्रान्तः । )

॥ इति द्वितीयोऽङ्कः ॥ २ ॥

---

१ हा आर्यपुत्र ! हा तात ! हा अम्ब ! एषा अशरणा केनापि अपह्रियेे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# तृतीयोऽङ्कः

( ततः प्रविशति चेटी । )

**चेटी** – ( साश्चर्यम् )

**[1]अणुराओ च्चिय दइएसु घडइ सोहग्गचंगिमगुणाइं ।**
**चंदु च्चिय जणइ मणीसु कठिणबंधेसु सलिलाइं ॥ १ ॥**

( प्रविश्य )

**देवलकः** – मागधिके ! कथं सुभाषिताध्ययनवाचालवक्त्रकुहराऽसि ? ।

**चेटी** – [2]अज्ज देवलय ! किं कहेमि ? विचित्ताओ मणोवित्तीओ । तादिसं पि विज्जाहररायकुमारं भत्तारं मल्लिआ न पडिवज्जदि ।

**देवलकः** – अन्यत्र बद्धरागा सम्भाव्यते ।

**चेटी** – [3]साहु विण्णायं । ( पुनः कर्णे एवमेव । )

**देवलकः** – अहो ! प्रकृत्यैव कुपात्रे निर्बन्धः स्त्रीलोकस्य ।

**चेटी** – [4]अज्ज ! मा एवं आइससु ।

**तं चिय परमत्थेणं रमणिज्जं जत्थ हिययवीसामो ।**
**हरिसंति असोयलया जेणं पायप्पहारेहिं ॥ २ ॥**

**देवलकः** – इदानीं चित्राङ्गदः किमनुतिष्ठति ? ।

**चेटी** – [5]विचित्तेहिं विणयकम्मेहिं विचित्ताहिं पसाहणदाणपइन्नाहिं पडिदिणं पसादेदि, परं न मल्लिया पसीयइ ।

**देवलकः** –भद्रे !

---

१ अनुराग एव दयितेषु घट्यति सौभाग्यचङ्गिमगुणान् ।
चन्द्र एव जनयति मणीषु कठिनबन्धेषु सलिलानि ॥

२ आर्य देवलक ! किं कथयामि ? विचित्रा मनोवृत्तयः, तादृशमपि विद्याधरराजकुमारं भर्त्तारं मल्लिका न प्रतिपद्यते ।

३ साधु विज्ञातम् ।

४ आर्य ! मा एवं आदिश ।
तद् एव परमार्थेन रमणीयं यत्र हृदयविश्रामः ।
हृष्यन्ति अशोकलताः येन पादप्रहारैः ॥ २ ॥

५ विचित्रैः विनयकर्मभिः विचित्राभिः प्रसाधनदानप्रतिज्ञाभिः प्रतिदिनं प्रसादयति, परं न मल्लिका प्रसीदति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अकाण्डकोपिनो भर्त्तुरन्यासक्तेश्च योषितः ।**
**प्रसत्तिश्चेतसः कर्तुं ब्रह्मणाऽपि न शक्यते ॥ ३ ॥**

भवतु, देवी चन्द्रलेखा किमादिशति ? ।

**चेटी** – [1]अवि मारिस्सं, न उण अन्नस्स पडिवादयस्सं ति आइसइ ।

**देवलकः** – मल्लिकायाः कीदृशो निर्बन्धः ? ।

**चेटी** – [2]अवि मरिस्सं, न उण अवरं परिणयस्सं ति निर्बन्धः ।

**देवलकः** – तदेवं सम्भाव्यते–

**उन्मत्तप्रेमसंरम्भादारभन्ते[ ऽत्र कामिनः ? ]**
**तत्र प्रत्यूहमाधातुं ब्रह्माऽपि खलु कातरः ॥ ४ ॥**

तदलमनया मीमांसया । अपरमाश्चर्यमाकर्णय – खेचराणामपि दुर्लभायामस्यां भूमौ प्रातः सिद्धायतने मया मनुष्यो दृष्टः ।

**चेटी** – [3]देवलय ? तं चिय मणुस्सं गवेसिदुं भट्टिणीए चंदलेहाए पेसिद म्हि । ता कत्थ सो चिट्ठदि ? ।

**देवलकः** – विलोकय गत्वा, एष सिद्धायतने तिष्ठति । अहमपि मल्लिकाया दिव्यफलान्युपनयामि । ( इति निष्क्रान्तः । )

॥ **विष्कम्भकः** ॥

( ततः प्रविशति सम्पातमूर्च्छितो मकरन्दः । )

**मकरन्दः** – ( चेतनामास्थाय विलोक्य च सविमर्शम् )

**स्वप्नं किं नु ?, किमिन्द्रजालमथवा किं चेतसो विभ्रमो ?,**
**दोषः कोऽपि किमेष मे नयनयोर्विश्वैकसम्मोहकृत् ? ।**
**पाताले त्रिदिवेऽथ किं समभवज्जन्मान्तरं मेऽवरं ?,**
**कोऽस्मि ? क्वास्मि ? किमस्मि कर्म विदधत् ?**
**क्षिप्तोऽस्मि केनात्र च ? ॥५॥**

( सर्वतो निरूप्य )

---

१ अपि मारयिष्यामि, न पुनः अन्यस्मै प्रतिपादयिष्यामीति आदिशति ।

२ अपि मरिष्यामि, न पुनः अपरं परिणेष्यामि ।

३ देवलक ? तमेव मनुष्यं गवेषयितुं भट्टिन्या चन्द्रलेखया प्रेषिताऽस्मि । तत् कुत्र स तिष्ठति ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एताः किन्नरगीतयः श्रुतिपथामोदं यथा कुर्वते
क्षौमाकल्पमयच्छदच्छविजुषः शाखा यथा शाखिनाम् ।
आशाः शक्रशरासनैर्वनसरोमाणिक्यरोधोमहः( हैः ? )
किर्मीरास्तनुते यथा रतिमयी सेयं तथा स्वर्गभूः ॥ ६ ॥

भवतु, परिक्रमामि ।( पुरोऽवलोक्य ) कथमिदं वीतरागप्रतिमाप्रसाधितमध्यभागं देवतायतनम् ? आचक्षते हि शाश्वतिकानि दिव्यभूमिषु सिद्धायतनानि सिद्धान्तविदः ।

( सप्रश्रयं प्रणम्य साश्रमञ्जलिमाधाय )

श्रीनिर्वाणपुराधिनाथ ! भगवन्नस्तोकलोकत्रयी-
शोकोद्धारधुरीण ! विश्वजनतासङ्कल्पकल्पद्रुम ! ।
अस्मासु प्रणतैकवत्सल ! कृपापात्रेषु तांस्तांश्चिरं
कामान् पूरय चूरय प्रतिकलं प्रत्यूहवज्रार्गलाः ॥ ७ ॥

( नेपथ्ये )

[1]अवरेहि वि कूवजलेहि न हु न जीवंति मामि ! वल्लीओ ।
जलहरजलसित्ताणं का वि [ य ] अवरा मुहच्छाया ॥ ८ ॥

मकरन्दः – ( आकर्ण्य ) कथमेष मल्लिकाशब्दानुसारी ध्वनिः ? ।

( पुनर्नेपथ्ये )

[2]वल्लहजणविरहीणं पाणपवासो वि बाहिरी किरिया ।
संताव-रुण्ण-गहिलत्तणाइ पुण कित्तियं कम्मं ? ॥ ९ ॥

मकरन्दः – निश्चितमयं विरहव्यथाभिर्मरणोन्मुखाया मल्लिकाया ध्वनिः । यदि वा जीवितमपि तस्यास्तपस्विन्याः सन्दिग्धम्, किं पुनर्ध्वनिः ? । (विलोक्य) येयं पराचीनवदना पुष्प-फलान्युपचिनोति मृगाक्षी तस्याः परिदेवनध्वनिरयम् । भवतु, समीपीभूय सम्भाषयामि । कथमियं तिर्यगवलोकयन्ती मां भूयोभूयस्तरुभिस्तिरोधत्ते ? भवतु, पदानुसारेणानुगच्छामि ।

---

१ अपरैरपि कूपजलैः न खलु न जीवन्ति सखि ! वल्ल्यः ।
जलधरजलसिक्तानां काऽपि च अपरा मुखच्छाया ॥ ८ ॥

२ वल्लभजनविरहिणां प्राणप्रवासोऽपि बाह्या क्रिया ।
सन्तापरुदितग्रथिलत्वादि पुनः कियत् कर्म ? ॥ ९ ॥

४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( ततः प्रविशति लतागृहस्थस्तापसकुमारः मनोरमा च । )

**तापसः** – (साश्चर्यमात्मगतम्) अहो ! जन्मान्तरदृश्यस्यार्थस्यात्रैव निदर्शनम् ।

**उत्पातेषु महत्स्वपि सुमेधसा जीवितं न हातव्यम् ।**
**सति जीविते कथञ्चिद् घटते किञ्चित् पुनः प्रेयः ॥ १० ॥**

**मकरन्दः** – ( विलोक्य ) कथं तापसकुमारः अत्यन्तसदृशावयवस्तस्या मल्लिकायाः ?, जाने मल्लिकां परिवृत्य वेधसाऽयं घटितः । भवतु, प्रणमामि । ( इति प्रणमति । )

**तापसकुमारः** – स्वस्ति, समीहितमाप्नुहि, मनोरमे ! आसनमुपनय ।

**मकरन्दः** – ( उपविश्य साभिलाषं स्वगतम् )

**अहो ! गात्रस्य सौन्दर्यम्, अहो ! वाचां विदग्धता ।**
**अहो ! मध्यस्य तुच्छत्वम्, अहो ! श्रोणेर्विशालता ॥ ११ ॥**

**तापसकुमारः** – कुतो भवानस्मिन् दिव्यजनसमुचितसञ्चारे रत्नसानौ समायातः ? ।

**मकरन्दः** – साम्प्रतं सिद्धायतनात् परतः पुनरहमपि न जानामि ।

**मनोरमा** – ( सोपहासम् ) [1]परदो आगमणे अहं कहिस्सं ।

**मकरन्दः** – ( सस्पृहमात्मगतम् )

**अमुमकृत यदङ्गनां न वेधाः**
**स खलु यशस्वितपस्विनां प्रभावः ।**
**त्रिजगति कथमन्यथा कथाऽपि**
**क्षततमसां तपसां पदं लभेत ? ॥१२॥**

( प्रकाशम् ) भगवन् ? अपरिचितमपि चिरपरिचितमिव मे हृदयम्, ततः किमपि प्रष्टुमभिलषामि ।

**तापसकुमारः** – न नाम सर्वाणि कर्माणि परिचयमपेक्षन्ते ।

**क्षणदृष्टेऽपि कुत्रापि दृढं सङ्घटते मनः ।**
**बालस्तदात्वजातोऽपि जनन्याः स्निह्यति स्तने ॥१३॥**

**मकरन्दः**–

**न सर्वकामुकापेक्षं स्त्रीणां दौर्भाग्यलाञ्छनम् ।**
**हिमानी शाखिनां द्वेष्या यवस्तम्बस्य तु प्रिया ॥१४॥**

---

१ परतः आगमने अहं कथयिष्यामि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तापसकुमारः** – ( साक्षेपम् ) कोऽस्याभिभाषितस्य प्रस्तुतेनाभिसम्बन्धः ? ।

**मकरन्दः** – अयं सम्बन्धः – प्रकाश्यमपि न सर्वापेक्षम् । ततो यदि मयि प्रसीदति भगवान्, तदा समादिशतु – कमभिजनं स्वजन्मना पवित्रितवानसि ? किमर्थं च विषयसुखोपभोग्ये वयसि सर्वाङ्गीणसुभगे च वपुषि महाक्लेशमयः सोऽयमङ्गीकृतस्तपोविधिः ? ।

**तापसकुमारः** – महापुरुष ! सत्यं प्रकाश्य एवायमर्थः । तथापि ममान्तःकरणमतिविह्वलमिदानीं केनापि हेतुना, वाच्यमवाच्यं वा न किञ्चिद् विवेचयति । ततः शृणु, कथयामि–वैताढ्याचलस्य देहैकदेशो रत्नसानुनामा गिरिरयम् ।

**मनोरमा** – [1]तदो किं ? ।

**तापसकुमारः**– रथनूपुरचक्रवालनगरस्याधिपतेर्वैनतेयनाम्नो विद्याधरराजस्य प्रथममहिषी जन्द्रलेखा, तदेतस्य वारिषेणनाम्ना शाश्वतिकेन भगवता जिनेश्वरेण सम्भावितगर्भभागस्य सिद्धायतनस्य शिखरातिलङ्घनेन तदात्वविस्मृतनभोगमनविद्या सद्यो रत्नसानाविह पपात ।

**मकरन्दः** – अहो ! भय-कौतुककारी कथासन्निवेशः ।

**तापसकुमारः** – खेचराधिपत्यविरहविषादिनी च विषयानपहाय विद्याप्रसाधनार्थं षाण्मासिकं तापसव्रतमिह लतागृहे गृहीतवती ।

**मनोरमा** – [2]तदो तदो ? ।

**तापसकुमारः** – व्रतसमाप्तौ प्रसन्नायां च विद्यायां चिरपरित्यक्तकुसुमायुधान्धलमानसा किरातयुवानमेकमुपभुक्तवती ।

( मनोरमा सलज्जमधोमुखी भवति । )

**मकरन्दः** – भगवन् ! अतीव व्रीडाकरमाचरितं तया ।

यदि वा–

**तावन्महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता ।**
**यावज्ज्वलति नाङ्गेषु हतः पञ्चेषुपावकः ॥१५॥**

**तापसकुमारः** – पूर्वदुष्कर्मपाकेन सञ्जातगर्भा प्रसूतमात्रैव तं गर्भमल्पीयसा महार्घ्येण नेपथ्याकल्पेन संयोज्य –(इत्यर्द्धोक्ते तूष्णीम्भवति । )

---

१ ततः किम् ? ।

२ ततः ततः ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मकरन्दः** – ( सोत्सुकम् ) ततः किं कृतवती ?।

**तापसकुमारः** –पञ्चशैले, नहि नहि अत्रैव प्रवर्धितवती ।

**मकरन्दः** – ( स्वगतम् ) निश्चितमयमतः परं कृत्रिममभिदधाति, तद् जाने स गर्भो मल्लिका । दर्शितानि च पञ्चशैलाधिवासिना श्रेष्ठिना ब्रह्मदत्तेन महाराजवैनतेयनामाङ्कितान्यङ्गुलीयकानि । अनेन पुनर्मल्लिकासोदरेण भाव्यम् ।

**तापसकुमारः** – स गर्भः पुनरहम् । विषयाणां विशेषतश्च स्त्रीणां दुःखहेतुतां विज्ञाय तपोविधिमङ्गीकृतवानस्मि ।

**मकरन्दः** –भगवन् ! अतः परमनुभवविरुद्धमभिदधासि ।

> **नाम्नाऽपि यत्र सुदृशां परमः कलङ्कः**
> **तस्मै नमः शिवपथाय न तस्य चिन्ता ।**
> **संसारवर्त्मनि पुनः सुदृशो विहाय**
> **विघ्नो न किञ्चिदनघस्य सुखस्य बीजम् ॥१६॥**

( तापसकुमारः सात्त्विकभावान् नाटयन्नधोमुखस्तिष्ठति । )

**मनोरमा** – ( तापसं विलोक्य स्वगतम् )[1] नूणं सो एस पुरिसो जं चंदलेहा वावाइदुमिच्छति । भोदु, पुरो जाव जाणिस्सं । ( प्रकाशम् ) तुमं पि किं पि अप्पणो चरिदं कहेसु ।

**मकरन्दः** –भद्रे ! खेचराणां चरितश्रावणे मनुजकीटानामस्मादृशामाकर्णितं चरितं किमधिकमाश्चर्यमाविष्करोति ? तथापि श्रुणु – सुवर्णद्वीपवासी जिनदत्तनामा क्रमागताद्भुतवैभवः परमधार्मिकप्रकाण्डं वणिगस्ति ।

**मनोरमा** – [2]तदो तदो ?

**मकरन्दः** – तस्य चैक एव चरमवयःप्रसूतो बाल्यादपि दुरोदरप्रवासितपितृसम्पत्तिर्जठरपिठरीभरणमात्रेऽपि प्रत्यहं परमुखप्रेक्षो मकरन्दनामा सूनुरहम् ।

**तापसकुमारः** – अहह ! दुश्चरितसन्निवेशः ।

> **व्यसनं सौजन्यवतां कार्कश्यं योषितां श्रियां चलता ।**
> **कार्पण्यं क्षोणिभृतां चत्वारि विधातुरधमानि ॥१७॥**

**मनोरमा** –

---

१ नूनं स एष पुरुषः यं चन्द्रलेखा व्यापादयितुमिच्छति, भवतु, पुरो यावद् ज्ञास्यामि। त्वमपि किमपि आत्मनः चरितं कथय ।

२ ततः ततः ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]अच्छरियं ते वि जियंति ते वि पहसंति ते वि कीलंति ।
उयरभरणे वि पिच्छंति निच्चमवराण जे वयणं ॥१८॥

मकरन्दः – यौवनारम्भे च सञ्जातवेश्याव्यसनोऽहम् ।

तापसकुमारः – ( सेर्ष्यारोषम् ) अतः परमश्रव्यचरितोऽसि, मा पुरो व्याहृथाः ।

जात्यन्धाय च दुर्जनाय च जराजीर्णाखिलाङ्गाय च
ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय वा ।
यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया
पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रज्येत कः ? ॥१९॥

मकरन्दः – भगवन् ! अनुचितमभिदधासि ।
जगतोऽपि यदिह निन्द्यं तद् यासां धर्मकर्मवदनिन्द्यम् ।
तासां पणहरिणदृशां गवेष्यते किमपरं श्रेयः ? ॥२०॥

अपि च –
आगन्तुकेन कार्यं घनसलिलं पणवधूवशीकरणम् ।
एतेषु त्रिषु शक्तो ब्रह्माऽपि न निर्णयं कर्तुम् ॥२१॥

( तापसकुमारः सरोषमन्यतोऽवलोकयति । )

मनोरमा – [2]भयवं ! पसीय पसीय, पुरओ सुणेहि ।

मकरन्दः – ( सविनयम् ) भगवन् ! कोऽयमस्मासु दैवहतकेषु सोऽयमप्रसादातिरेकः ? । प्रसीद, दुःश्रवमपि निर्भाग्यशेखरस्य मे श्रृणु चरितलेशवैशसम् ।

तापसकुमारः – ( सावज्ञम् ) तर्हि त्वरिततरमावेदय, अतिक्रमति मध्याह्नसवनसमयः ।

मकरन्दः – कार्पटिकवृत्तितया च ज्ञातिषु स्थातुमशक्यः सुवर्णद्वीपमपहाय पञ्चशैलं द्वीपमाश्रितोऽस्मि ।

तापसकुमारः – समुचितमाचरितम् ।

स्थातुं तेजस्विना शक्यं न जातिषु गतश्रिया ।
अस्तापास्तवपुर्भास्वान् नभस्तेन विमुञ्चति ॥२२॥

---

१ आश्चर्यं तेऽपि जीवन्ति तेऽपि प्रहसन्ते तेऽपि क्रीडन्ति ।
उदरभरणेऽपि प्रेक्षन्ते नित्यमपरेषां ये वदनम् ॥ १८ ॥

२ भगवन् ! प्रसीद प्रसीद, पुरतः श्रृणु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मकरन्दः** – ( सबाष्पम् ) पञ्चशैले च कुतोऽपि वल्लभाजनतः केनापि महीयसामश्राव्येण विधिना विप्रयुक्तः ।

**तापसकुमारः** – ( साशङ्कम् ) ततः किम् ? ।

**मकरन्दः** – मरणार्थमात्मानमम्भोधौ पातयन्नेकमायातं भारुण्डपक्षिणमद्राक्षम् । ततः परमात्मानं सिद्धायतनोपवने विलोकितवानस्मि ।

**तापसकुमारः** – ( स्वगतम् ) निश्चितमयं मांसलुब्धेन भारुण्डपक्षिणा रत्नसानाविह समानीतः ।

**मकरन्दः** – ततः प्रसीद, समादिश मे विरहवह्निदन्दह्यमानवपुषः किमपि मरणौपयिकम् ।

( नेपथ्ये )

गृहाणैतद् देव्या समुपनीत दिव्यफलनिकरम् ।

**तापसकुमारः** – अपरमपि किमपि प्रयोजनम् ? ।

**देवलकः** – योऽयं मर्त्यः समायातः स किमाकृतिः ? किमासन्नश्च ? इति परिज्ञातुमपरं प्रयोजनम् ।

**तापसकुमारः** – ( सरोषम् ) एतेन किं ज्ञातेन ? ।

**देवलकः** – ( साक्षेपम् ) अमुं प्रश्नं नाहमर्हामि, किन्तु देवी चन्द्रलेखा । (–इत्यभिधाय निष्क्रान्तः । )

**तापसकुमारः** – ( वामाक्षिस्फुरणमभिनीय अपवार्य च ) मनोरमे ! यथाऽयं देवलकः साक्षेपवादी तथा जाने देवी चन्द्रलेखातः कोऽप्यपायो मकरन्दस्यास्य प्रत्यासन्नः । तत् कथय किमधुना समुचितमाधातुम् ? ।

( प्रविश्य )

**मागधिका** – ( सम्भ्रान्ता ) [1]अच्चाहिदं अच्चाहिदं ।

**तापसकुमारः** – ( सभयाशङ्कम् ) विश्रब्धमभिधीयताम् , कस्य अत्याहितम् ? ।

( मागधिका कर्णे एवमेव । )

**तापसकुमारः** – ( सकम्पम् ) अहो ! मयि निरनुरोधा माता । ( विमृश्य )

---

१ अत्याहितं अत्याहितम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**द्विजन्मनः क्षमा मातुर्द्वेषः प्रीतिः पणस्त्रियः ।**
**नियोगिनश्च दाक्षिण्यमरिष्टानां चतुष्टयम् ॥ २३ ॥**

( पुनः सदैन्यम् ) मागधिके ! मम त्वमम्बाप्रतिकृतिः। अहमिदानीं भवत्साहायकेनैव व्यसनाम्भोधिमतिलङ्घयिष्यामि । ततो वितर्कय कमप्युपायमेतस्य मम जीवितस्य परित्राणाय ।

**मागधिका** – [1]संपदं सिद्धाययणावत्थाणमेव उवाओ ।

**तापसकुमारः** – समुचितमाह भवती, न प्रभवन्ति सिद्धायतनस्थायिनां क्षुद्रोपद्रवाः ।

**मकरन्दः** – ( स्वगतम् ) यथाऽयं तापसः सदैन्यं मामवलोकयति तथा जाने मम किमप्यनिष्टमुपस्थितम् । ( प्रकाशं सावष्टम्भम् ) भगवन् ! भवति दृष्टे हृदयवल्लभा दृष्टा । कृतार्थोऽहम् । अतः परं कुतोऽपि परित्राणमभिलषामि ।

**मृत्यवे बद्धकक्षस्य किं मे देवी करिष्यति ? ।**
**किमाधत्तां पतिः क्षुद्रो मर्त्यस्य फलनिस्तृषः ॥२४॥**

**तापसकुमारः** – किमायत्तं ते जीवितम् ? ।

**मकरन्दः** – एतावन्तं कालं कृतान्तायत्तम्, साम्प्रतं त्वदायत्तम् ।

**तापसकुमारः** – उत्तिष्ठ, तर्हि व्रज सिद्धायतनम् । यदियं मागधिका कारयति तदेव तत्रस्थितेन त्वया कर्त्तव्यम् ।

( मागधिकया सह मकरन्दो निष्क्रान्तः । )

( नेपथ्ये व्योमतः शिलापातः । )

**उभौ** – ( विलोक्य सत्रासम् ) किमिदम् ? ।

( प्रविश्य देवलकेन दत्तहस्तावलम्बा )

**चन्द्रलेखा** – आः पाप मनुष्यकीट ! द्वीपान्तरस्थिताया अपि मद्वत्सायाः पृष्ठं न मुञ्चसि ? इदानीमनुभवतु दुर्विनयस्य फलम् । ( देवलकम् ) शिलाया अधोभागादाकर्षय दुरात्मानमेतम्, येन मृतमपि स्वहस्तेन मारयामि ।

**देवलकः** – ( शिलामुत्क्षिप्य ) देवि ! न कोऽप्यधस्तादस्ति ।

**चन्द्रलेखा** – ( सवैलक्ष्यम् ) तर्हि निष्फलोऽयं शिलापातप्रयासः । गतः

१ साम्प्रतं सिद्धायतनावस्थानमेव उपायः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्वापि दुरात्मा मनुष्यकीटः । हला मनोरमे ! मध्यस्थिताऽस्मद्व्यापाराणां विघातमासूत्रयसि ? ।

( मनोरमा वेपते । )

**तापसकुमारः** – ( सरोषम् ) अम्ब ! किमेनं निरपराधं महात्मानं व्यापादयसि ? । मामेव हृदयसन्तापहेतुं दुरपत्यं व्यापादय ।

**चन्द्रलेखा** – आः पापे ! सोल्लुण्ठवादिनि ! कौमारकुलिटे ! यदि ते व्यापादनसमीहा तदानीमेषा पूरयामि । ( तापसं केशैर्गृहीत्वा ) देवलक ! गृहाणैतां दुष्टपरिचारिकाम् ( इत्यभिदधाना सदेवलका निष्क्रान्ता । )

## ॥ तृतीयोऽङ्कः ॥ ३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# चतुर्थोऽङ्कः ।

( ततः प्रविशति सिद्धायतनस्थो मकरन्दः । )

**मकरन्दः** – ( साश्चर्यम् ) महाव्यसनसम्पातेऽपि दुस्त्यजाः प्राणिनामसवः । यदिदानीं मल्लिकातुल्याकारं तापसकुमारं दृष्ट्वा पुनर्जीवितुमभिलषति मे हृदयम् ।

इष्टैरपि वियुक्तस्य क्षपितस्यापि शत्रुभिः ।
निर्लूनावयवस्यापि न मृत्युः प्राणिनः प्रियः ॥१॥

तदहमिदानीमपहाय महाक्लेशानारम्भ-परिग्रहान्, आधाय मनःसमाधिम्, तस्यैव तापसकुमारस्याभ्यर्णे व्रतमाचरामि येन परलोकगतस्यापि मे मल्लिका प्रिया सङ्घटते । (विमृश्य) पुनः कथं चन्द्रलेखा मामभिक्रुध्यति ? । निश्चितमियं मल्लिकां ब्रह्मदत्तभवनादपहृतवती । तावदयमर्थो मागधिकायाः स्फुटो भविष्यति ।

( नेपथ्ये )

[1]हा मियंकवयणे ! हा सरोजनयणे ! हा पडिवन्नवच्छले भट्टिदारिए! कहिं सि दाणिं ? देहि मे पडिवयणं । हा निकरुणे चंदलेहे ! केरिसो एस दे निययम्मि अवच्चम्मि पच्चूहकरणसंरंभो ? ।

**मकरन्दः** – कथमेषा मागधिका प्रलपति ? ।

( प्रविश्य )

**मागधिका** – [2]अज्ज मयरंद ! पिच्छ मल्लियाए भट्टिदारियाए कीदिसं संवुत्तं ? ।

**मकरन्दः** – ( ससम्भ्रमम् ) मागधिके ! हर्ष-विषादयोरन्तरे तिष्ठामि । मल्लिकासन्नामश्रवणात् प्रहृष्टोऽस्मि । अपायशङ्कया पुनर्विषण्णोऽस्मि । तत् कथय किमत्र क्वापि मल्लिकाऽस्ति ? ।

**मागधिका** – [3]एसा मल्लिया पंचसेलाओ अवहरिय गुलियापओगेणं पुरिसरूवं काऊण लयाहरे चंदलेहाए विमुक्का चिट्ठदि ।

---

१ हा मृगाङ्कवदने ! हा सरोजनयने ! हा प्रतिपन्नवत्सले भर्तृदारिके ! कुत्र असि इदानीम् ? देहि मे प्रतिबचनम् । हा निष्करुणे चन्द्रलेखे ! कीदृश एष ते निजे अपत्ये प्रत्यूहकरणसंरम्भः ? ।

२ आर्य मकरन्द ! पश्य मल्लिकाया भर्तृदारिकायाः कीदृशं संवृत्तम् ? ।

३ एषा मल्लिका पञ्चशैलाद् अपहृत्य गुटिकाप्रयोगेण पुरुषरूपं कृत्वा लतागृहे चन्द्रलेखया विमुक्ता तिष्ठति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मकरन्दः** – उपपन्नमिदम्। कथितं च तापसेन–स पुनर्गर्भोऽहमेव। ( पुनर्विमृश्य ) मागधिके ! किमिति पुरुषरूपं कारिता मल्लिका ? ।

**मागधिका** – [1]अवरेण अवहाररक्खणत्थं।

**मकरन्दः** – ( साक्षेपम् )।

अर्गला रक्षणे स्त्रीणां प्रीतिरेव निरर्गला ।
पदातिपरिवेषस्तु पत्युः क्लेशाय केवलम् ॥२॥

भवतु, ततः किं तस्याः साम्प्रतम् ?

( मागधिका उच्चैःस्वरं प्रलपति । )

**मकरन्दः** – मागधिके ! कथय कथय, पर्याकुलोऽस्मि ।

**मागधिका** – [2]किं कहेमि मंदभाइणी ? मल्लियाए दाणि जीविदस्स वि संदेहो वट्टदि। सा खु लयाहराओ चंदलेहाए सभवणं नेऊणं तुमं समरंती कसाघादेहिं ताडिदा।

**मकरन्दः** – मागधिके ! मां स्मरन्ती कशाभिरभिताडिता प्रिया। हा प्रिये मल्लिके ! मत्प्रेमग्रहिला महाक्लेशाननुभवसि। ( विमृश्य ) मागधिके ! व्रज त्वम्। ब्रूहि चरममेतत् प्रियाम्–स्मर्त्तव्यस्त्वया कदाचिन्महाक्लेशहेतुषु स्मर्यमाणेषु निर्भाग्यशेखरः सोऽहम्।

**मागधिका** – [3]महाभाय ! कीस अत्ताणयं मिल्लेसि ?

**मकरन्दः** – मागधिके ! न किमपि वक्तव्यस्त्वया। साम्प्रतमहं न शक्नोमि प्रियापरित्राणाक्षमोऽहं जीवितुम्। ( उत्थाय सास्रं देवतां प्रणम्य ) भगवन् ! जन्मान्तरेऽपि मे सुलभदर्शनो भूयाः। ( असिधेनुकयाऽऽत्मानमतिहन्तुमारभते, विलोक्य ) दोःस्तम्भ इव मे।

( आकाशे )

कोऽयं सिद्धायतनेषु प्राणाभिघातः ? ।

**मागधिका** – [4]महाभाय ! दिव्वाए वायाए को वि तुमं वारेदि।

---

१ अपरेण अपहाररक्षणार्थम्।

२ किं कथयामि मन्दभागिनी ? मल्लिकाया इदानीं जीवितस्यापि सन्देहो वर्तते, सा खलु लतागृहात् चन्द्रलेखया स्वभवनं नीत्वा त्वां स्मरन्ती कशाघातैस्ताडिता।

३ महाभाग ! कस्मादात्मानं मुञ्चसि ? ।

४ महाभाग ! दिव्यया वाचा कोऽपि त्वां वारयति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( पुनराकाशे )

पुण्य[स्य] समिधः सत्य-दया-दान-प्रशान्तयः ।
अस्त्रा-ऽग्नि-कण्ठपाशास्तु देहदुःखाय केवलम् ॥३॥

**मकरन्दः** – ( सव्रीडमुपविश्य ) ततस्ततः ? ।

**मागधिका** – [1]अहं दाणि भट्टिदारियाए एदाइं वत्था-ऽऽहरणाइं समप्पिदुं किंचि कहिदुं च तुहं समीवे पेसिद म्हि । ( वस्त्राणि कटकानि च समर्पयति । )

**मकरन्दः** – कुत एतानि प्राप्तानि प्रियया ? ।

**मागधिका** – [2]चित्तंगदेण अणुकूलिदुं दिन्नाणि ।

**मकरन्दः** – ( सहर्षाश्चर्यम् )

तरुणान्तरादवाप्तं समर्पयन्ती प्रसाधनं पत्युः ।
तरुणीयं दिशति मुदं मुधा सुधा सा पुरस्तस्याः ॥४॥

( सप्रमोदमुत्थाय परिदधाति । पुनः सौत्सुक्यम् ) मागधिके ! कथय प्रियासन्दिष्टं वाचिकम् । अनुभवतु चिरादयं विप्रयोगानलाभितप्तो जनः प्रमोदकणिकाम् ।

**मागधिका** – [3]तुमं ज्जेव मे पई । अप्पा उण तए लहुणा हविय चित्तंगदाओ रक्खिदव्वो । जदो–

सो कुणइ किं पि पच्छा तणुआइ परेसु जो समत्थेसु ।
गोवत्तलहुं अप्पं कप्पिअ हरिणा हओ कंसो ॥५॥

एस भट्टिदारियाए संदेसो । अवरं च न पहवंदि सिद्धालयनिवासीणं दुरिदाइं । तदो तए इध ज्जेव चिट्ठिदव्वं । अदुवा का वि विरहवसेणं अरई भोदि तदा एदस्स उज्जाणकेलिसरोवरस्स कूलकच्छेण कीलिदव्वं । ( इत्यभिधाय निष्क्रान्ता । )

---

१ अहमिदानीं भर्तृदारिकया एतानि वस्त्राभरणानि समर्पयितुं किञ्चित् कथयितुं च तव समीपे प्रेषिताऽस्मि ।

२ चित्राङ्गदेन अनुकूलयितुं दत्तानि ।

३ त्वमेव मे पतिः । आत्मा पुनः त्वया लघुना भूत्वा चित्राङ्गदाद् रक्षितव्यः । यतः–
स करोति किमपि पश्चात् तनूयते परेषु यः समर्थेषु ।
गोपत्वलघुं आत्मानं कल्पयित्वा हरिणा हतः कंसः ॥ ५ ॥
एष भर्तृदारिकायाः सन्देशः । अपरं च न प्रभवन्ति सिद्धालयनिवासिनां दुरितानि । ततस्त्वया इह एव स्थातव्यम् । अथवा काऽपि विरहवशेन अरतिः भवति तदा एतस्य उद्यानकेलिसरोवरस्य कूलकच्छेन क्रीडितव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मकरन्दः** – ( साश्चर्यम् )

प्राणानपि विमुञ्चन्ति निबद्धप्रीतयः स्त्रियः ।
विद्वांसोऽपि जुगुप्सन्ते तास्तथापि कुतूहलम् ॥६॥

( आत्मवेषमवलोक्य ) एवंविधेनापि दिव्याकल्पनेपथ्येन हृदयभेदिना च पटुना चटुसहस्रेण मल्लिका चित्राङ्गदं न कामयते ।

ताः सन्ति किं न शतशः ? शतशोऽपि पुम्भि-
रभ्यर्थिताः स्मरपदानि न याः स्मरन्ति ।
ते सन्ति नैव पुनरेणविलोचनानां
नाम्नाऽपि ये प्रतिकलं विलयं न यान्ति ॥७॥

( ऊर्ध्वमवलोक्य ) ललाटन्तपनस्तपनो बाधतेऽङ्गानि, मर्मभेदी घर्मः विरहानलश्च । भवतु, क्षणमेकमुद्यानकेलिसरःकूलकच्छेषु विहरामि । (इति परिक्रामति । समन्ततोऽवलोक्य सहर्षम् )

दात्यूह–कुर्कुट–कपिञ्जल–चक्रवाक–
सारङ्ग–भृङ्गकलकूजितमञ्जुकुञ्जाः ।
उद्यानकेलिसरसीतटफुल्लमल्ली-
वल्लीगृहाङ्गणभुवो रमयन्ति चेतः ॥८॥

( पुनर्मल्लिकां स्मृत्वा सौत्सुक्यम् )

आस्यं हास्यकरं शशाङ्कयशसां बिम्बाधरः सोदरः
पीयूषस्य वचांसि मन्मथमहाराजस्य तेजांसि च ।
दृष्टिर्विष्टपचन्द्रिका स्तनतटी लक्ष्मीनटीनाटयभू-
रौचित्याचरणं विलासकरणं तस्याः प्रशस्यावधेः ॥९॥

अपि चेदानीं वियोगरोगाभितापविक्लवायाः प्रियायाः –

वक्त्रं पाणिमिलत्कपोलफलकं नेत्रे च पद्माम्बुजे
गात्रेषु प्रतिकर्म जर्जर[र ?]सं वाचः श्लथार्थान्वयाः ।
तस्याः स्मेरसरोजसुन्दरदृशः शङ्के दिशः सर्वतः
खेलन्मच्चरितप्रशस्तिसुभगस्तम्भाङ्कितोरःस्थलाः ॥१०॥

( पुनः कर्णं दत्वा ) कथं पञ्चमोद्‌गारसारः समापतति गीतामृतासारः ? ।

अन्योन्यं विषयाणां गुरु–लघुभावो न कोऽपि यदि नाम ।
अन्येव तदपि रेषा गीतीनां कामिनीनां च ॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( पुनः सजुगुप्सम् )

गीतमपि रक्तकण्ठैरुद्घटितं प्रीतये किल न येषाम् ।
पाषाणसोदराणां तेषामेषोऽञ्जलिर्बद्धः ॥१२॥

( पुरोऽवलोक्य ) कथमितः खेचरशिबिरसन्निवेशः कोऽपि ? । ( वामाक्षिस्फुरणमभिनीय ) निश्चितमत्र तेन चित्राङ्गदेन भाव्यम्। तदन्यतो व्रजामि । ( इति परिक्रम्य ) कथमिदं सर्वतो माणिक्यप्रभापुञ्जपिञ्जरितदिगन्तरं निर्मानुषप्रचारं पुरः सौधम् ? । भवतु, प्रविश्य विलोकयामि ।

( नेपथ्ये )

महाभाग ! निवर्त्तस्व निवर्त्तस्व । केन दुष्टदैवेन प्रेरितो महापापनिधानं सौधमिदमधिरोहसि ?

मकरन्दः – ( सकौतुकम् ) कथमयं सौधाङ्गणपञ्जरस्थः शुको व्याहरति ?। तत् कथं वामाक्षिस्फुरणमपीदमस्माकं शुभोदर्काय ? ।

असम्भाव्यार्थलाभान्ता विपत् सम्पत्तिसोदरा ।
विषं हि व्याधिविध्वंसि पीयूषप्रतिहस्तकः ॥१३॥

( ततः प्रविशति यथानिर्दिष्टः शुकः ।)

शुकः – भो भो महाभाग ! निवर्तस्व निवर्तस्व ।

मकरन्दः – ( सावष्टम्भम् ) भोः ! मा भैषीः, विश्रब्धं ब्रूहि । स्व-परापायनिवर्त्तनक्षमोऽहम् । ततो यदि शकुन्त एव त्वं पटुचटुव्याहारस्तदानीं किमाश्चर्यम् ? । अथ व्याजान्तरं किमपि तदा प्रकाशय परमार्थम् । पर्याकुलोऽस्मि श्रवणोत्कण्ठया ।

शुकः – व्याजान्तरमेवेदम् , प्रतीकारासम्भवेन पुनरप्रकाश्यम् ।

मरकन्दः –ममाल्पत्वदर्शनेन प्रतीकारासम्भवमभिदधासि तदा भ्रान्तोऽसि।

अत्यद्भुतं[..................] कर्म तदादधाति
स्वल्पोऽपि कोऽपि महतामपि यन्न साध्यम् ।
कर्पूरपूरणविधेरधिकां वहन्ति
ताम्बूलतो वदनवारिरुहाणि लक्ष्मीम् ॥१४॥

शुकः – समाकर्णय तर्हि–वैभलनगरनिवासी वैश्रमणनामा सांयात्रिको मनोरमया सधर्मचारिण्या समं महार्घ्य-विचित्रभाण्डनिभृतं यानपात्रमधिरूढः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मकरन्दः – ततस्ततः ?।

शुकः – पारप्ररूढप्रौढनानाजातीयवानेयवृक्षदिदृक्षया यानपात्र[स्थ]या मनोरमया समं भूमौ समुत्तीर्णवान् ।

मकरन्दः – ततस्ततः ?।

शुकः – विलोकयंश्च कोकिलाकुलकुलायसमृद्धकक्षान् अनेकतिलक-चम्पक-पुन्नागनागप्राग्रहरान् उपत्यकावृक्षान्, एकामनेकानर्घ्यप्रसाधनप्रभाप्राग्भारदुरवलोकावयवविवेकामर्धजरतीं वनितामपश्यत् ।

मकरन्दः – अहो ! कौतु[क]कारी कथासन्निवेशः ।

शुकः – उदीरितः स्वगतश्च परमादरं दर्शयन्त्या तया स्वभवनमिदमानीतः । अनुकूलितश्च तैस्तैश्चाटुकारैः तैस्तैर्दिव्यफलरसाहारै[:तैस्तै]रनेकदर्शनीयदिव्यप्रदेशोपदर्शनैः तैस्तैः खेचरजनोचितप्रसाधनविधानैः कियन्त्यपि दिनानि ।

मकरन्दः – ( सत्वरम् ) ततः किम् ?।

शुकः – एकदा च धवलयति सौधांसवे महसि दिक्चक्रवालं चन्द्रशालायां पर्यङ्कनिषण्णस्तया वृषस्यन्त्या सम्भोगार्थमत्यर्थमभ्यर्थितः ।

मकरन्दः – ( सजुगुप्सम् ) अनुचितमतः परं श्रोतुम् । कथाऽपि पापीयसां पुंसां महते कलुषाय प्रभवति, तथापि व्याहर । अनिर्वहणे हि प्रारम्भो नीचतां प्रकाशयति ।

शुकः – स च वीतरागवचनश्रवणपवित्रितात्मा परदारपरिहारव्रतमनुरुन्धानो रिरंसुमपि तां दूरमपकर्णितवान् ।

मकरन्दः – ( सानन्दम् ) स्तुत्यचरितोऽसि वैश्रवण !, एष ते प्रणामार्थं बद्धोऽञ्जलिः ।

शुकः – अनन्तरमसौ तदात्वपल्लवितकोपाटोपपाटलाक्षी –'अरे पाप ! यावज्जीवमनुभव पञ्जरचारकाधिवासवैशसम्, परिपालय परदारपरिहारव्रतम्' –इति व्याहरन्ती केनापि चूर्णप्रयोगेण तं महात्मानं शुकं कृतवती । स चाहं दैवहतकः । तां पुनर्मनोरमां प्रथमदिवस एव पुरुषाकारधारिण्याः स्वदुहितुः परिचारिकां विहितवती ।

मकरन्दः – सा पुनरिदानीं खेचरी क्व वर्तते ?।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**शुकः** – इदानीं सा वैभलनगरतः समागताया गन्धमूषिकाभिधानायाः परिव्राजिकाया आश्रमे सपरिवारा तिष्ठति ।

**मकरन्दः** – यदि वैभलनगरतः समायाता परिव्राजिका तर्हि सा तवापि परिचिता सम्भाव्यते ।

**शुकः** – ( निःश्वस्य ) पञ्जरस्थस्य मे परिचयः किं कुरुते ? ।

**मकरन्दः** –साम्प्रतं पानाशनचिन्तां कस्ते करोति ? ।

**शुकः** – प्रत्यासन्नशिबिरनिवासी खेचरीप्रार्थितश्चित्राङ्गदः कुमारः ।

**मकरन्दः** – महाभाग !

सम्पत्तिरस्य रोहन्ती भाग्यानां मुखमीक्षते ।
स्वशक्तितोलनं नाम माहात्म्यं तु महात्मनाम् ॥१५॥

ततो यद्यस्य पापीयसः पर्वणः किमपि प्रतिविधानमस्ति तदा प्रकाशय, येन स्वशक्तिमाविष्करोमि ।

**शुकः** – ( सनिर्वेदम् )

अर्थित्वमेकं नीचत्वमनर्थित्वमनीचता ।
दोषा गुणाश्च ये त्वन्ये ते कुटुम्बकमेतयोः ॥१६॥

अपि च –

तृणेष्वपि गवादीनां वेधसा वीक्ष्य गौरवम् ।
एकान्तलघुपक्षार्थमर्थिनो निर्मिताः पुनः ॥१७॥

तदहमत्रार्थे न किमपि त्वया वक्तव्यः । पक्षिभाववैशसात् परप्रार्थनावैशसं पापीयस्तरं मे प्रतिभाति ।

**मकरन्दः** – महाभाग ! परमार्थमभिहितवानसि ।

अर्थी पिताऽपि सन्तापमाधत्ते किं पुनः परः ? ।
पीयूषसागरस्यापि पूरः प्लावयति प्रजाः ॥१८॥

किन्तु –

अर्थित्वेऽपि वयं तत्र जानीमो गौरवं परम् ।
यत्रार्थलाभः कोऽपि स्यात् परकार्यक्रियाक्षमः ॥१९॥

तदलं विषादेन ।

**शुकः** – अस्ति प्रतिविधानम् , परमशक्यानुष्ठानम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मकरन्दः** – किं तत् ? ।

**शुकः** – भूमिजातस्य करस्पर्शः ।

**मकरन्दः** – कथं तर्हि अशक्यानुष्ठानम् ? ।

**शुकः** – इह खेचरगिरौ भूमिजन्मनोऽसम्भवात् ।

**मकरन्दः** – यद्यप्यसम्भाव्यस्तत् कथमहमत्र ? ।

**शुकः** –आर्य ! किं नामालीकाश्वासनाभिः प्रतारयसि ? विद्याधरवेषदर्शनादेव ज्ञातम्– न भवान् भूमिजन्मा ।

(मकरन्दः विहस्य शुकं पञ्जरादाकर्षति ।)

**शुकः** – ( आत्मानमवलोक्य ) कथं वैश्रवणोऽस्मि ? । ( पुनः सविनयम् ) आर्य ! निष्कारणवत्सल ! त्वयाऽहमेवमुपकृतः कं प्रत्युपकारमादधामि ? ।

**मकरन्दः** – अयमेव साम्प्रतं प्रत्युपकारः, व्रज त्वं सिद्धायतनम् । अन्यथा यदि चन्द्रलेखा समायास्यति तदानीं कमप्यपायमाधास्यति । मनोरमादर्शनमपि तत्र स्थितस्य सम्भाव्यते । अहमपि सौधमध्यमवलोक्य समागत एव ।

( शुको निष्क्रान्तः । )

( नेपथ्ये )

कपिञ्जल ! शुकार्थं गृहीतानि दाडिमप्रभृतीनि फलानि त्वया ? ।

**मकरन्दः** – ( साशङ्कम् ) कथं सा चन्द्रलेखाऽभ्युपैति ? । ( पुनः सभयम् ) भूयो भूयो वामाक्षिस्फुरणमपायं महान्तं पिशुनयति ।

( नेपथ्ये )

कपिञ्जल ! उपनीतवस्त्राभरणा प्रिया किमस्मासु पतिपद्यते ? ।

**कपिञ्जलः** – कुमार ! तत् प्रतिपद्यते यद् वैरिषु ।

**मकरन्दः** – यथाऽयं परुषस्वरस्तथा निश्चितममुना चित्राङ्गदेन भाव्यम् ।

( नेपथ्ये )

**तत् तावदास्तां कामिन्यो न यत् साध्या धनैर्विना ।**
**धनैरपि न यत् साध्या तत्र किञ्चिद् विचिन्त्यताम् ॥२०॥**

**मकरन्दः** – व्रजामि निरपायं सद्धायतनम् ( इति परिक्रामति । )

( ततः प्रविशति कपिञ्जलदत्तहस्तावलम्बश्चित्राङ्गदः । )

**चित्राङ्गदः** –कपिञ्जल ! उपनय शुकाय फलानि ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**कपिञ्जलः** – कुमार ! कस्मै उपनयामि ? नाऽऽस्ते पञ्जरे शुकः ।

**चित्राङ्गदः** – ( सभयम् ) किमिदानीमुत्तरं विधेयमस्माभिश्चन्द्रलेखायाः । (पुनः सम्मुखीनं मकरन्दमवलोक्य ) कपिञ्जल ! कोऽयम् ? ।

**कपिञ्जलः** – ( वेषमवलोक्य ) कुमार ! सोऽयं युष्मत्प्रेमप्रत्यूहः ।

**चित्राङ्गदः** – ( सरोषम् ) अरे ! कस्त्वम् ? ।

**मकरन्दः** – ( स्वगतम् ) अहं वणिग्मात्रमेकाकी च । अयं विद्याधरः सपरिच्छदश्च । स्त्रीनिमित्तं च वैरम् । तदवश्यमेव उपस्थितो मे मृत्युकालः । तदिदानीं किं दैन्यजल्पितैः ? । अपि च–

**मानिनो मानिनस्तावद् यावद् यान्ति न दीनताम् ।**
**संसहेत न बन्धं यः केशरी केशरी हि सः ॥२१॥**

( प्रकाशम् ) त्वमपि हि कः ? ।

**चित्राङ्गदः** – ( सक्रोधम् ) अरे वाचाटकिराट ! मां पृच्छसि ? अहं विद्याधरकुमारश्चित्राङ्गदः ।

**मकरन्दः** – ( साक्षेपम् ) अहं तर्हि विद्याधरचक्रवर्तिकुमारो मकरन्दः ।

**कपिञ्जलः** – अरे वणिक्कीट ! शौण्डीर्यमेदुरांसस्थलेन क्षत्रवंशावचूलेन कुमारेण सह स्पर्धसे ? ।

**मकरन्दः** – अरे पदातिसारमेय ! अनभिज्ञोऽसि परमार्थवर्त्मनाम् ।

**वर्णानपेक्षं शौण्डीर्यं सत्त्वमात्रे निषीदति ।**
**सत्त्वं तु वणिजेऽपि स्यान्न स्यात् क्षत्रेऽपि न (? च) क्वचित् ॥२२॥**

**चित्राङ्गदः** – ( सरोषम् ) अरे मुखर ! मत्प्रियामभिलषतस्ते दैवं प्रतिकूलम् ।

**मकरन्दः** – ( सरोषम् ) तवापि मत्प्रियामभिलषतो दैवं प्रतिकूलम् ।

**चित्राङ्गदः** – ( नेपथ्यमुपलक्ष्य ) अरे ! मत्प्रियाया नेपथ्यं परिदधतस्ते प्रत्यासीदति मृत्युसमयः ।

**मकरन्दः** – ( सोपहासम् ) अमुनैव नेपथ्यलाभेन निश्चितं मया सा प्रिया तत्रभवतो भवतः, न पुनर्मम ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चित्राङ्गदः** – ( स्वगतम् ) उपहसति मामयं दुरात्मा वणिकीटः । तदिदानीमेव करोमि कृतान्तातिथिम् । अथवा नयामि मल्लिकायाः समीपम् । पश्यन्त्याश्च तस्यास्तरवारिणा पातयाम्यस्य मूर्धानम्, येन सा प्रतिभयेन मां प्रतिपद्यते। यदि वा सामप्रयोगसाध्ये [न] दण्डप्रयोगः । ततः प्रथममुपशान्तयाम्येनम् । (प्रकाशम् ) महाभाग !

**शब्दाः कथञ्चित् सर्वेऽपि बाह्यवाच्यावगाहिनः ।**
**व्यसने धैर्यमित्येष शब्दस्त्वात्मैकगोचरः ॥२३॥**

ततो विरिमता वयं तवामुना मनःसौष्ठवेन । तदतः परं मित्रमसि नः । यन्मित्रोचितं तदस्मासु विदध्याः ।

**मकरन्दः** – ( स्वगतम् )

**कर्पूरप्रभवस्यापि प्रदीपस्यासिता मषी ।**
**विद्विषो विनतस्यापि प्रियमायाति विप्रियम् ॥२४॥**

( प्रकाशम् ) महापुरुष ! वयमपि विस्मितास्तवामुना मनःसौष्ठवेन । तदतः परं मित्रमसि नः । यन्मित्रोचितं तदस्मास्वपि विदध्याः ।

**चित्राङ्गदः** – अरे मनुष्यापसद ! निर्व्याजमपि सव्याजं व्याहरसि ?, अनुभवेदानीं कुटिलतायाः फलम् । एषा समाप्यते ते जीवितकथा । कोऽत्र भोः ? ।

( प्रविश्य कृपाणपाणिः )

**पुरुषः** – एषोऽस्मि ।

**चित्राङ्गदः** – अरे कराल ! केशैर्गृहीत्वा दुरात्मानमेनं शिबिरमुपनय । वयमपि गन्धमूषिकाया आश्रमे व्रजामः ।

( इति निष्क्रान्ताः सर्वे । )

**॥ चतुर्थोऽङ्कः ॥ ४ ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ पञ्चमोऽङ्कः ॥

( ततः प्रविशति मनोरमा । )

**मनोरमा** – ( सप्रमोदम् ) [1]जीवदु चिरं मयरंदो, जेण एसा मे पइभिक्खा दिन्ना । ता दाणि मए मयरंदस्स वि पाणेहिं पि पियं कायव्वं । तदो तहा कहं पि अंबं गंधमूसियं पसादइस्सं जधा सा मयरंदस्स मणोरहं संपाडेदि । भणिदं च अज्जउत्तेण वेसमणेण–गच्छ तुमं, जधा विन्नवेसु अंबाए गंधमूसियाए पणामकहणपुव्वं तुह वुत्तं । तं दाणि तहिं गच्छामि । ( इति पुरोऽवलोक्य ) कधं देवलओ एदि ? ।

( ततः प्रविशति देवलकः । )

**देवलकः** – ( सविषादम् )

**असन्तुष्टा विपद्यन्ते विभवस्य विपश्चितः ।**
**रतस्य राजकामिन्यः स्वस्थस्य खलसेवकाः ॥१॥**

वृथा मह्यं देवी चन्द्रलेखा कुप्यति । किमहं महात्मानमेनं निरागसं मकरन्दं व्यापादयितुं शक्नोमि ? भर्तृदारिकां मल्लिकां कशाभिरभिताडयितुं प्रभवामि ?, यदि च देवी चन्द्रलेखा प्रातिकूल्यमनयारुद्वहति तदानीमनार्यं कर्म स्वयमेव कथं नाचरति ? ।

( पुनः सकौतुकम् )

**न रवेः कुमुदानि सुधाकरे [च] कमलानि दधति सङ्कोचम् ।**
**दग्धानां सरसीनां यथा तथा व्यसनमाकालम् ॥२॥**

यदि मल्लिका चन्द्रलेखामनुकूलयति तदा मकरन्देन वियुज्यते । अथ मकरन्दमनुनयति तदा चन्द्रलेखया कदर्थ्यते । तदवश्यमनया मर्त्तव्यम् ।

**मनोरमा** – [2]अज्ज देवलय ! केण मरियव्वं ? ।

---

१ जीवतु चिरं मकरन्दः, येन एषा मे पतिभिक्षा दत्ता । तद् इदानीं मया मकरन्दस्यापि प्राणैरपि प्रियं कर्त्तव्यम् । ततः तथा कथमपि अम्बां गन्धमूषिकां प्रसादयिष्यामि यथा सा मकरन्दस्य मनोरथं सम्पादयति । भणितं च आर्यपुत्रेण वैश्रमणेन–गच्छ त्वम्, यथा विज्ञपय अम्बायै गन्धमूषिकायै प्रणामकथनपूर्वं तुभ्यं उक्तम् । तद् इदानीं तत्र गच्छामि । कथं देवलक ऐति ? ।

२ आर्य ! देवलक ! केन मर्त्तव्यम् ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**देवलकः** – भर्तृदारिकया मल्लिकया ।

**मनोरमा** –[1] किं ति ? ।

**देवलकः** – पानाऽशनत्यागात् ।

**मनोरमा** – ( सभयम् )[2] मल्लियाए ईदिसो अणत्थो वट्टदि ? ।

**देवलकः** – अनर्थ इति किमुच्यते ?, चन्द्रलेखायां विरुद्धायां यज्जीवति मल्लिका तत् कौतुकम् ।

**वडवामुखे महौजसि विरामविमुखं ज्वलत्युदरधाम्नि ।**
**क्षारत्वं कियदुदधेः शुष्यति यन्नैष तच्चित्रम् ॥३॥**

तद् व्रजाम्यहं देव्यादेशेन चित्राङ्गदमाकारयितुम् ।

**मनोरमा** –[3] अज्ज देवलय ! कहं उण एसा मल्लिया पंचबाणसमाणरूवं पि विज्जाहरं वरं न पडिवज्जदि ? ।

**देवलकः** – ( साक्षेपम् ) मनोरमे ! बहिर्मुखाऽसि प्रेमकथानाम् ।

**यद् यस्य नाभिरुचितं न तत्र तस्य स्पृहा मनोज्ञेऽपि ।**
**रमणीयेऽपि सुधांशौ न नाम कामः सरोजिन्याः ॥४॥**

अत्रार्थे चित्राङ्गदः पुनरुपालभ्यः, यः प्रेमविमुखां स्त्रियमभिलषन्नात्मानं क्लेशयति ।

**मनोरमा** –[4] साहु जंपिदं तुमए,

**जम्मंतरलक्खपरूढदुक्खरुक्खस्स तिन्नि साहाओ ।**
**सेवा खलेसु विहवो परेसु पिम्मं अपिम्मेसु ॥५॥**

---

१ किमिति ।

२ मल्लिकाया ईदृशः अनर्थो वर्तते ? ।

३ आर्य देवलक ! कथं पुनः एषा मल्लिका पञ्चबाणसमानरूपमपि विद्याधरं वरं न प्रतिपद्यते ? ।

४ साधु जल्पितं त्वया,
जन्मान्तरलक्षप्ररूढदुःखवृक्षस्य तिस्रः शाखाः ।
सेवा खलेषु विभवः परेषु प्रेम अप्रेमसु ॥५॥
अपि च–यत् किल उल्लसति दृढं अनुरागपराङ्मुखेषु अनुरागः ।
तदेव विषं विषं पुनर्मथनभवं तस्य प्रतिबिम्बम् ॥६॥
तदिदानीं कथय–कुत्र मल्लिका वर्तते ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवि य–

जं किर उल्लसइ दढं अणुरायपरम्मुहेसु अणुराओ ।
तं चिय विसं विसं उण महणभवं तस्स पडिबिंबं ॥६॥

ता दाणि कहेसु – कहिं मल्लिया चिट्ठदि ? ।

**देवलकः** – एषा सौधोपवने तिष्ठति ।

**मनोरमा** – [1]गच्छ तुवं चित्तंगदसमीवे, अहं गंधमूसियं पणमिदुं गच्छामि ।

( इति निष्क्रान्तौ )

॥ **विष्कम्भकः** ॥

( ततः प्रविशति यथानिर्दिष्टा मल्लिका मागधिका च । )

**मल्लिका** – ( सखेदम् ) [2]मागहिए ! कित्तियमित्तं दिणं ? ।

**मागधिका** – [3]पभायसमओ वट्टदि ।

**मल्लिका** – [4]मागहिए ! जाणसि किं पि पउत्तिं अज्जउत्तस्स मयरंदस्स ? ।

**मागधिका** – ( स्वगतम् ) [5]जइ वित्तंतं कहिस्सं ता दाणिं ज्जेव सा जीवियं चइस्सदि । भोदु । ( प्रकाशम् ) जाणामि – अत्थि सिद्धालए मणोरमाए तुह पिम्मकहाहिं आसासिज्जंतो ।

**मल्लिका** – [6]मागहिए ! तए दाणिं अमयच्छडाहिं अहिसित्ता, चंदणरसेहिं अणुलित्ता, चंदकिरणेहिं णिव्वाविदा । पुणो वि भोयणं विणा वि कित्तियाइं दियहाइं जीविस्सं ।

**मागधिका** – [7]भट्टिदारिए ! करेसु भोयणं । चयसु निब्बंधं । कीस पिसुणजणसंतावेहिं अत्ताणयं किलामेसि ? ।

---

१ गच्छ त्वं चित्राङ्गदसमीपे, अहं गन्धमूषिकां प्रणन्तुं गच्छामि ।

२ मागधिके ! कियन्मात्रं दिनम् ? ।

३ प्रभातसमयो वर्त्तते ।

४ मागधिके ! जानासि कामपि प्रवृत्तिं आर्यपुत्रस्य मकरन्दस्य ? ।

५ यदि वृत्तान्तं कथयिष्यामि तद् इदानीमेव सा जीवितं त्यक्ष्यति । भवतु । जानामि– अस्ति सिद्धालये मनोरमया तव प्रेमकथाभिः आश्वास्यमानः ।

६ मागधिके ! त्वया इदानीं अमृतच्छटाभिः अभिषिक्ता, चन्दनरसैः अनुलिप्ता, चन्द्रकिरणैर्निर्वापिता । पुनरपि भोजनं विनाऽपि कियन्ति दिवसानि जीविष्यामि ।

७ भर्तृदारिके ! कुरु भोजनम् । त्यज निर्बन्धम् । कस्मात् पिशुनजनसन्तापैः आत्मानं क्लमयसि ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मल्लिका** – [1]मागहिए ! न मे को वि पिसुणो जणो, अहं ज्जेव सव्वस्स पिसुणा । अवि य –

**अवगणियव्वा वल्लहसुहत्थिणा पिसुणलोयसंतावा ।**
**मंडणलोलाउ सहंति दंतचूडापवेसदुहं ॥७॥**

**किंच – जं किं पि अंबाए चंदलेहाए समीहिदं तं करोमि ।**

( नेपथ्ये )

[2]**वच्छे ! किं समीहिदं ? ।**

**मागधिका** – ( विलोक्य ) [3]**कधं देवी चंदलेहा ? ।**

( प्रविश्य तामरसेन दत्तहस्तावलम्बा )

**चन्द्रलेखा** – [4]**वच्छे ! किं समीहिदं ? ।**

**मल्लिका** – [5]**मह मरणं ।**

**चन्द्रलेखा** – (सविषादं तामरसं प्रति )

**मेघानां तदशेषतापहरणं तत् पूरणं जाह्नवी-**
**मुख्यद्वीपवतीशतस्य तदथ प्रारोहणं भूरुहाम् ।**
**तेनैकेन वराकचातकतृषामध्वंसनेनाभवद्**
**यद्वृद्ध्यर्थमहो ! गुणौघविमुखो दोषैकदृष्टिर्जनः ॥८॥**

तत् तादृशं गर्भोद्वहन–प्रसवक्लेशवैशसम् , तदश्रद्धेयं महापुरुषस्य ब्रह्मदत्तस्य वेश्मनि परिपालनार्थं मोचनम्, स एष राजलक्ष्मीविशेषकेण विद्याधरकुमारेण संयोजनप्रयासः, सर्वमेतेन वणिक्कीटवियोजनेन विफलतां नयति सैषा मे पुत्री मल्लिका ।

**तामरसः** – ( अपवार्य ) **देवि ! शिथिलयतु उचितश्चित्राङ्गदसङ्गमाग्रहः ।**

---

१ मागधिके ! न मे कोऽपि पिशुनो जनः, अहमेव सर्वस्य पिशुना । अपि च–
अवगणयितव्या वल्लभसुखार्थिना पिशुनलोकसन्तापाः ।
मण्डनलोलाः सहन्ते दन्तचूडाप्रवेशदुःखम् ॥७॥
किञ्च – यत् किमपि अम्बायाश्चन्द्रलेखायाः समीहितं तत् करोमि ।

२ वत्से ! किं समीहितम् ? ।

३ कथं देवी चन्द्रलेखा ? ।

४ वत्से ! किं समीहितम् ? ।

५ मम मरणम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्यतः परं क्षुत्पिपासाक्लान्ताया भर्तृदारिकायाः किमप्यमङ्गलं जायते तदानीं महान् जनापवादः ।

**चन्द्रलेखा** – ( साक्षेपम् ) भूयांसोऽपवादाः सन्ति । अयमपि तेषामेकदेशे निषीदतु ।

**तामरसः** – ( स्वगतम् ) परित्यक्तसतीव्रतायाः कर्मशचेतसोऽस्याः काऽपवादाभिशङ्का ? ।

तामसौ जनुषाऽन्धस्य यदिन्दु-तपनावपि ।
भग्नब्रह्मव्रतस्यैवं कृत्या-ऽकृत्यातिगं जगत् ॥९॥

**चन्द्रलेखा** – स्वैरवृत्तितया तावदहं ज्ञातिलोकेन बहिष्कृता, तदतः परमपवादः कमपरमपायमुपनेष्यते ? ।

**तामरसः** – ( स्वगतम् ) सत्यं महादेवी,

अभिशङ्कते जनोऽयं जनापवादादपायसञ्जनकात् ।
अपरं जनापवादं तु मन्यते व्योमपुष्पमिव ॥१०॥

( प्रकाशम् ) देवि ! दुहितरि न चित्तकठोरभाव [उचितः] ।

**चन्द्रलेखा** – वत्से ! किं मां मातरमात्मीयामवजानासि ? । प्रतिपद्यस्व माम् । प्रवर्त्तस्व स्वकर्त्तव्ये, येन तदुचितां सामग्रीं करोमि ।

**मल्लिका** – ( सरोषम् ) [1]पडिवन्ना तुमं मए वेरिणी । पयट्टाऽहं कायव्वे मरणे ! करेहि मरणसमुचिदं सामग्गिं ।

**चन्द्रलेखा** – ( साक्षेपम् ) आः पापे ! निर्निमित्तवैरिणि ! निरनुरोधे ! कृतघ्ने ! त्वामहं गर्भे दधाना पितृ-श्वसुरकुलाभ्यां निर्वासिता सती निर्मानुषप्रचारे वनेचरवृत्त्या रत्नसानौ क्लेशमनुभवामि । तदिदानीं एवं मां वक्रोक्तिभिरुत्तेजयसि ? ।

**मल्लिका** – [2]अंब ! नाहं किलेसकारणं, किंतु अणायारो कारणं ।

**चन्द्रलेखा** – ( तामरसं प्रति ) पश्यन्नसि दुहितुर्मम मर्मोद्घट्टनाम् ।

**मागधिका** – ( सरोषं मल्लिकां प्रति ) [3]भट्टिदारिए ! पडिहदा सि तुमं । जुत्तं ते जणणीपवायपसंसणं ? ।

---

१ प्रतिपन्ना त्वं मया वैरिणी । प्रवृत्ताऽहं कर्तव्ये मरणे । कुरु मरणसमुचितां सामग्रीम् ।
२ अम्ब ! नाहं क्लेशकारणम्, किन्तु अनाचारः कारणम् ।
३ भर्तृदारिके ! प्रतिहताऽसि त्वम् । युक्तं ते जननीप्रवादप्रशंसनम् ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तामरसः** – भर्तृदारिके !

**प्रियानुरोधाद् बध्नाति विप्रियेऽपि जनो मनः ।**
**पङ्कभाजोऽपि हर्षाय वर्षाः सस्याभिलाषिणाम् ॥११॥**

ततो मातुरनुरोधेन बधान विप्रियेऽपि चित्राङ्गदे हृदयम् ।

**मल्लिका** – [1]अज्ज तामरस ! जं तुमं भणासि तं ज्जेव अहं कुणंती चिट्ठामि ।

**तामरसः** – ( सप्रमोदम् ) किं तत् ? ।

**मल्लिका** – [2]अज्जउत्तस्स मयरंदस्स अणुरोहेण विप्पियत्थे वि मरियव्वे बद्धं मे हिययं ।

**चन्द्रलेखा** – ( सदुःखमात्मगतम् )

**अकृत्यं फलवद् येषां तेऽप्यश्लाघ्या महात्मनाम् ।**
**नाम तेभ्यः पुनर्येषामकृत्यमपि निष्फलम् ॥१२॥**

इदं तावन्मदीयमश्लाघ्यं यत् किरातसम्बन्धेन गर्भसम्भूतिः । इदानीं पुनः स्वेच्छया दुहितृ-जामातृसुखमपि नास्ति । ( प्रकाशम् ) तामरस ! विरम विरम वचनक्लेशात्, अतः परं पतिरेवास्याश्चित्राङ्गदः सर्वमाधास्यति ।

( नेपथ्ये )

अत्रार्थे कः सन्देहः ? ।

**चन्द्रलेखा** – कथं प्राप्त एव कुमारः ? । तदेहि तामरस ! भगवतीं गन्धमूषिकां पश्यामि । ( इति सतामरसा निष्क्रान्ता । )

( ततः प्रविशति चित्राङ्गदः कपिञ्जलप्रभृतिकश्च परिवारः । )

**चित्राङ्गदः** – ( सविषादम् )

**दम्पत्योः पाक्षिकात् प्रेम्णः प्रेमाभावः सुखावहः ।**
**एककर्णस्थताडङ्कादताडङ्कं मुखं वरम् ॥१३॥**

तदिदानीं निष्प्रेमाणमेतां वनितामभिलषतो मनःप्रयासमात्रमेव परमार्थः । ( पुनः सकौतुकम् )

**यथा पुंसां स्त्रियः स्त्रिणां पुमांसो विषयस्तथा ।**
**तथापि सत्वराः प्रायः पुमांसो न पुनः स्त्रियः ॥१४॥**

---

१ आर्य तामरस ! यत् त्वं भणसि तदेव अहं कुर्वती तिष्ठामि ।

२ आर्यपुत्रस्य मकरन्दस्य अनुरोधेन विप्रियार्थेऽपि मर्त्तव्ये बद्धं मे हृदयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदेवं प्रतिमुहुः परिणयनसमुत्सुकोऽहमेव, न पुनरेषा योषित् ।

( मागधिका विलोक्य सिंहासनमुपनयति ।)

**चित्राङ्गदः** –( समुपविश्य मल्लिकां प्रति )

**मिथ्याग्रहं शिथिलय ग्रथिले ! निरुध्य**
**क्रोधं विचारपदवीषु मनो निधेहि ।**
**विद्याधराः क च नभोभवनावचूलाः ?**
**स्मेराक्षि ! भूमिकृमयः क च ते मनुष्याः ? ॥१५॥**

**मल्लिका** – (सरोषम् ) [1]नहोभवणावचूलत्तं पक्खीणं पि सुलहं, किं दाणि तेण ?। सोहग्गं खु मिहुणनिबंधणं, तं पुण तुहं नत्थि ।

**चित्राङ्गदः** – पक्षिकल्पोऽहम् ? दुर्भगश्च ?।

**मल्लिका** – ( सखेदम् ) [2]कहिदं मए। किं पुणो पुणो पुच्छसि ?। न सक्केमि तुमए सूलमहिसेणं समं खुहा-पिवासाहिं किलंता पुणो पुणो मंतिदुं।

( कपिञ्जलः सलज्जमधोमुखो भवति । )

**चित्राङ्गदः** –

**मां मल्लिके ! कुसुमबाणमपास्य हास्य-**
**व्रीडा-विषादजनकं वणिजं श्रयन्ती ।**
**प्रायेण नीचरतयो वनितास्तमेनं**
**लोकप्रवादमविवादमिहाऽऽदधासि ॥१६॥**

**मल्लिका** – [3]लोयपवायं निच्छियं करेमि पमाणं। तुमं पुण भंजेसि। परमहेलं मं अहिलससि ।

**चित्राङ्गदः** – ( सोपालम्भम् )

**स्पृहयति पुरुहूतस्यापि यां वामनेत्रा**
**त्रिभुवनमहनीयां तामिमामङ्गलक्ष्मीम् ।**
**वणिजि कृपणरत्ने निक्षिपन्ती मृगाक्षि !**
**प्रथयसि चतुराणां किं विषादं मनस्सु ? ॥१७॥**

---

१ नभोभवनावचूलत्वं पक्षिणामपि सुलभम्, किमिदानीं तेन ? । सौभाग्यं खलु मिथुननिबन्धनम्, तत् पुनः तव (त्वयि) नास्ति ।

२ कथितं मया । किं पुनः पुनः पृच्छसि ? । न शक्नोमि त्वया शूलमहिषेण समं क्षुधा-पिपासाभ्यां क्लान्ता पुनः पुनः मन्त्रयितुम् ।

३ लोकप्रवादं निश्चितं करोमि प्रमाणम् । त्वं पुनः भनक्षि । परमहिलां मां अभिलषसे ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मल्लिका** – [1]जइ अंगलच्छि वणियम्मि निक्खेवेमि ता वियड्ढजणमणस्स विसाओ । अह तुमम्मि निक्खेवेमि ता मह मणस्स । किंच–सव्वस्स वि जणस्स अप्पा वल्लहो, न उण परो । ता तुमं ज्जेव कहेसु, किं दाणिं करेमि ? ।

**चित्राङ्गदः** – किमेताभिर्वक्रोक्तिभिः ? । अवलम्बस्व दीर्घदर्शिताम् । विचिन्तय विद्याधरलक्ष्मीसौभाग्यम् । अनुतिष्ठ यदभिधत्ते जनयित्री ।

( मल्लिका निःश्वस्य तूष्णीमास्ते । )

**कपिञ्जलः** – स्वामिनि ! प्रत्युत्तरेण प्रसीद ।

( मल्लिका सरोषमास्ते । )

**चित्राङ्गदः** – ( सदैन्यम् )

अयि कुवलयनेत्रे ! देहि वाचं प्रसीद
प्रणयिषु वद मुग्धे ! कोऽप्रसादापवादः ? ।
त्वयि सुदति ! वदन्त्यां जीवितं यौवनश्री-
र्ललितमथ धनं वा चारिमा वा मुदे नः ॥१८॥

**मागधिका** – कुमार !

[2]अप्पाण लाहवं चिय विरम विसेसेसु अणुणयपराणं ।
बंधुअणचाडणेण य न णाम जीवंति गयपाणा ॥१९॥

**कपिञ्जलः** – कुमार ! सत्यमाह मागधिका । तदिदानीं विरम्यतेऽमुष्माद्-ध्यवसायात् । परिणयतामियं वणिजम् । अनुभवतु मनुष्यदास्यम् ।

( चित्राङ्गदः कपिञ्जलस्य कर्णे एवमेव । )

( कपिञ्जलो निष्क्रान्तः । )

**चित्राङ्गदः** – ( साक्षेपम् ) मल्लिके ! कीदृशस्ते मनोनिश्चयः ? ।

**मल्लिका** – [3]मयरंदं परिणेमि, न तुमं, एस मे निच्छओ ।

( ततः प्रविशति करालेन गृहीतकेशपाशः सन्दानितभुजो मकरन्दः कपिञ्जलश्च । )

---

१ यदि अङ्गलक्ष्मीं वणिजि निक्षिपामि तदा विदग्धजनमनसः विषादः । अथ त्वयि निक्षिपामि तदा मम मनसः । किञ्च–सर्वस्य जनस्य आत्मा वल्लभः, न पुनः परः । तत् त्वमेव कथय, किमिदानीं करोमि ? ।

२ आत्मनां लाघवमेव विरमस्व विशेषेषु अनुनयपराणाम् ।
बन्धुजनचाटनेन च न नाम जीवन्ति गतप्राणाः ॥१९॥

३ मकरन्दं परिणयामि, न त्वाम्, एष मे निश्चयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मकरन्द** – ( सावष्टम्भम् ) कपिञ्जल !

मल्लिकाप्रेमजालेन निबद्धावयवस्य मे ।
भुजयो रज्जुबन्धोऽयं पीडां व्रीडां करोतु काम् ? ॥२०॥

अपि च

मन्यावहे प्रभुरयं जलधिर्विधातुं
रत्नान्यधः शिरसि कल्पयितुं तृणानि ।
तां रत्नतां च तृणतां च निसर्गसिद्धा
मेषां पुनः स्थगयितुं नियतं वराकः ॥२१॥

स एष ते पतिर्मल्लिका-मकरन्दयोर्जीवितमपहर्तुमलम्भूष्णुः, स्वभावसिद्धं हृदयसम्बन्धं पुनरपहर्त्तुं तपस्वी ।

**मल्लिका** – ( विलोक्य सास्रम् ) [1]हा दिव्व ! किं नेदं ? । अज्जउत्तो मह कारणेणं कीदिसं अवत्थं गदो ? त्ति । मागहिए ! अन्नारिसं किं पि तुमए कहिदं ।

**मागधिका** – [2]भट्टिदारिए ! दाणि अप्पा वि मे विम्हरिदो वट्टदि ।

**मकरन्दः** प्रिये ! मा रोदीः । कियदेतत् ? । अपरमपि त्वदर्थव्यसनं मे मङ्गलाय ।

( मल्लिका तारस्वरं प्रलपति । )

**चित्राङ्गदः** – अरे मर्त्यापसद !

जात्मन्तरस्थितवतीं जनकाप्रदत्ता-
मन्यस्य योषितमिमामवलम्ब्य मोहात् ।
भाग्यार्जितं विजहतो निजजीवितव्यं
स्तोकाऽपि काऽपि न वणिज्यकला तवास्ति ॥२२॥

**मकरन्दः** – अरे खेचरकीट ! मन्दबुद्धे ! लोकव्यवहाराणामुपरि ल्पवसे ? ।

प्राणान् कार्यान्तरेणापि गच्छतो हतकानमून् ।
प्रियार्थं त्यजतो ब्रूहि का न मेऽस्ति वणिक्कला ? ॥२३॥

---

१ हा दैव ! किमिदम् ? । आर्यपुत्रः मम कारणेन कीदृशीं अवस्थां गतः ? इति । मागधिके ! अन्यादृशं किमपि त्वया कथितम् ।

२ भर्तृदारिके ! इदानीं आत्माऽपि मया विस्मृतो वर्तते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मल्लिका** – ( सावष्टम्भम् ) [1]अज्जउत्त ! मारेदु एस तुमं, जइ तुमए मारिदेणं अहं एदस्स भवामि ।

**चित्राङ्गदः** – मुग्धाऽसि दुग्धमुग्धनेत्रे ! मुग्धाऽसि । कृतान्तातिथौ कृते सत्येतस्मिन्नवश्यं मे भवती इति । तथा भवत्या अपि नायं मनुष्यकीटः । ततः कोऽयमनात्मनीनो विधिरुपक्रान्तस्त्वया ? ।

**मल्लिका** – [2]जइ दाणि न भविस्सदि ता जम्मंतरे वि भविस्सदि एस मे पई ।

**कपिञ्जलः** – भद्रे ! सरलहृदयाऽसि । भिन्नभिन्नवर्त्मनि सम्भविष्णवः सर्वेऽपि जन्तवस्तैस्तैः शुभैरशुभैर्वा कर्मभिः । विभिन्नरूपदेशानां जन्मान्तरेषु जन्मिनां कस्य केनाभिसम्बन्धः ? । ततो विमुञ्च कदाग्रहम्, प्रतिगृहाण विद्याधरकुमारम्, विलोकय विमानग्रग्रीवाधिरूढा प्ररूढप्रौढसौभाग्यसम्पदां सरिदर्णव-शिलोच्चय-द्वीपान्तराणां रामणीयकानि ।

( मल्लिका सरोषं तूष्णीमास्ते । )

**चित्राङ्गदः** – ( सावहेलं मकरन्दं प्रति )

**विहाय वितथाग्रहं विरम गर्हितादध्वनः**
**प्रयाहि पदमात्मनः प्रथय जिविकां कामपि ।**
**विबोधय कथञ्चन स्मितसरोजनेत्रामिमां**
**त्रुटद्विकटकन्धरो भवसि किं कृतान्तातिथिः ? ॥२४॥**

**मकरन्दः** – ( सरोमाञ्चम् )

**स एष मम सत्पथः पदमियं च मे मल्लिका**
**किमन्यदियमेव मे निखिलसम्पदां जीविका ।**
**विबुद्धमनया पुनः सह मया प्रयाणं दिवि**
**त्वरस्व निगृहाण मां परिणय स्वकान्तामिमाम् ॥२५॥**

**चित्राङ्गदः** –( सरोषम् ) अरे मनुष्यकीट ! वाचाट ! यदेवं मां वक्रोक्तिभिः प्रसभमुपहससि, तदुपस्थितस्ते मत्युकालः ।

**मकरन्दः** – ( सावष्टम्भम् ) किमिदमयुक्तम् ?

---

१ आर्यपुत्र ! मारयतु एष त्वाम्, यदि त्वया मारितेन अहं एतस्य भवामि ।
२ यदि इदानीं न भविष्यति तदा जन्मान्तरेऽपि भविष्यति एष मे पतिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आपदां स्कन्धमायोज्य स्तब्धाः सर्वत्र मानिनः ।
राजदण्डं हि पश्यन्तो धनं मुष्णन्ति दस्यवः ॥२६॥

**चित्राङ्गदः** – कोऽत्र भोः ! ? । उपनय कृपाणम् ।

( प्रविश्य पुरुषः कृपाणमुपनयति । )

**मल्लिका** – [1]मागहिए ! उत्थावेहि मं । अज्जउत्तस्स मयरंदस्स पढमं अप्पाणं वावाएमि । ( पुनः स्वयमुत्थाय परिकरबन्धमादाय ) अज्जउत्तस्स परलोगमग्गलग्गस्स एसा अहं पुरोवत्तिणी ।

**मागधिका** – [2]कहेमि एदं उवालिंगं (?) गंधमूसियाए । ( इति निष्क्रान्ता । )

**चित्राङ्गदः** – ( कृपाणमुत्क्षिप्य )

अयमथमुपैषि जिवितान्तं तरुणकृपाणविलूनकण्ठपीठः ।
स्मर किमपि करालकालवक्त्रभ्रुकुटिकुटीलुटितासुराशु दैवम् ॥२७॥

**मकरन्दः** – ( सरोमाञ्चं सविनयं प्रणम्य )

मैत्री-प्रमोद-कारुण्य-माध्यस्थ्यमहितोदयम् ।
स्मरामि क्लेशनाशाय वीतरागपदद्वयम् ॥२८॥

**मल्लिका** – ( चित्राङ्गदं प्रति ) [3]महाभाय ! ममं वावाएसु अणत्थकारिणिं, पच्छा एदं । ( इति कन्धरां प्रगुणयति )

( प्रविश्य )

**माकन्दः** – कुमार ! भगवती गन्धमूषिका त्वामादिशति ।

**चित्राङ्गदः** – ( कृपाणं विमुच्य अञ्जलिमाधाय ) किमादिशति भगवती ? ।

**माकन्दः** – स्मरसि कामप्यात्मनः प्रतिज्ञाम् ? ।

**चित्राङ्गदः** ( क्षणं विमृश्य ) न कामपि स्मरामि ।

**माकन्दः** – 'व्यापाद्यः सर्वोऽपि वीतरागप्रतिमामुपदर्श्य व्यापादनीयः' इति स्मरसि प्रतिज्ञामात्मनः ? ।

**चित्राङ्गदः** – अहो ! मन्मथान्धस्य मे प्रमादः, यदहं ह्यस्तनदिनप्रतिज्ञामपि न स्मरामि । ( पुनः सविनयम् ) माकन्द ! ब्रूहि गन्धमूषिकां भगवतीम्–त्रातोऽहं

---

१ मागधिके ! उत्थापय माम् । आर्यपुत्रस्य मकरन्दस्य प्रथमं आत्मानं व्यापादयामि । आर्यपुत्रस्य परलोकमार्गलग्नस्य एषा अहं पुरोवर्तिनी ।

२ कथयामि एतत् ..........गन्धमूषिकायै ।

३ महाभाग ! मां व्यापादय अनर्थकारिणीम्, पश्चादेतम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवत्या भ्रष्टप्रतिज्ञो नरककुहरात् । ततः स्वयमेवाऽऽगत्य दर्शय वीतरागप्रतिमामेतस्मै वध्याय ।

( प्रविश्य )

**गन्धमूषिका** – कुमार ! किमिदमपर्यालोचितकारित्वम् ? केयमदीर्घदर्शिता ! । ( पुनरपवार्य ) किमेतेन वराकेण व्यापादितेन ? । अहमेवैनं व्यापाद्य मल्लिकामनुरागिणीं विधाय त्वदेकशरणमाधास्ये ।

**चित्राङ्गदः** – महाप्रसादः । ( इत्यभिधाय सपरिकरो निष्क्रान्तः । )

**गन्धमूषिका** – माकन्द ! आयतबन्धनं मकरन्दं मल्लिकां च गृहीत्वा त्वरिततरमागच्छ । ( इति निष्क्रान्ताः सर्वे । )

**॥ पञ्चमोऽङ्कः ॥ ५ ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ षष्ठोऽङ्कः ॥

( ततः प्रविशति माकन्दः । )

**माकन्दः** – ( सविषादम् ) हा महासत्त्व ! हा प्रतिपन्नवत्सल ! हा कृतज्ञचूडामणे मकरन्द ! क्वासि ? देहि मे प्रतिवचनम् । ( पुनर्विमृश्य ) न खलु दुरात्मनां स्त्रीणां कृत्यमकृत्यं वा किमप्यस्ति । अपरथा निरागसो मकरन्दस्य विप्रियमाचरन्त्या भगवत्याः को विचारः ! का वा महीयसी प्रयोजनसिद्धिः ? । यदि चन्द्रलेखा केनापि दुराग्रहेणाऽऽत्मनः प्रतिपन्थितामुद्वहति मकरन्दे ततः किमायातं गन्धमूषिकायाः ?

सतां दुनोति चेतांसि मार्गं स्वार्थेऽपि लङ्घयन् ।
लङ्घयत्यपरस्यार्थे यः पुनस्तस्य किं ब्रुवे ? ॥१॥

अथवा किमनया प्रभुकृत्यमीमांसया ? । निवेदयामि वैश्रवणप्रसाधितां प्रयोजनसिद्धिं भगवत्यै । ( परिक्रामति । पुरोऽवलोक्य ) कथमितोऽभ्युपैति तामरसः ? ।

( ततः प्रविशति तामरसः )

**तामरसः** –

एताः कुरङ्गकदृशः प्रमदस्य बीज-
माद्यं यथा यदि तथा स्थिरचेतसः स्युः ।
तस्मै पुराणपरिकल्पितगौरवाय
को नाम निर्वृतिसुखाय तदा यतेत ? ॥२॥

( पुनः सविषादम् ) अहो ! पारिप्लवता स्त्रीणाम्, अहो ! क्षणिकता प्रेम्णाम्, अहो ! भङ्गुरता प्रतिज्ञानाम् । यदिदानीं तानि तादृशानि मकरन्दनिमित्तं पानाऽशनत्याजनानि, तानि तादृशानि चित्राङ्गदं प्रतिकूलाचरणानि, तानि च चन्द्रलेखां प्रति मर्मोद्घट्टनागर्भाणि विप्रियभाषितानि, सर्वथा विस्मृत्य मल्लिका पुनर्जातजन्मेव चिरप्ररूढप्रौढप्रेमेव चित्राङ्गदमनुनयति । प्रोत्साहितवती च मकरन्दं व्यापादयितुं चन्द्रलेखां गन्धमूषिकां च । अथवा–

ददाति रागिणी प्राणानादत्ते द्वेषिणी पुनः ।
रागो वा यदि वा द्वेषः कोऽपि लोकोत्तरः स्त्रियः ॥३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'स पुनरिदानीं मकरन्दः क्व वर्तते ?' इति ज्ञायते ? ।

**माकन्दः** – ( उपसृत्य ) सखे तामरस ! इदानीं यथा मकरन्दो वर्त्तते तथा शृणु, कथयामि ।

**तामरसः** – सखे ! समासतः प्रथमं तावदाचक्ष्व, प्राणानां कुशलं न वा ? ।

**माकन्दः** – कथं न कुशलं प्रतिज्ञातवत्यां चित्राङ्गदविवाहं भगवत्यां गन्धमूषिकायाम् ? ।

**तामरसः** – एतावतैव भवतो वक्रोक्तिव्याहारेण परिज्ञातः समासतः परमार्थः । तथापि सविस्तरमावेदय ।

**माकन्दः** – अतीतरजनीनिशीथे गन्धमूषिकायाः समादेशेन मकरन्दमहं सिद्धायतनस्थाय भगिनीपतये वैश्रवणाय उपनीतवान् ।

**तामरसः** – किमियं गन्धमूषिकाया मनोरमा भागिनेयी ? । अत एव गन्धमूषिका वैश्रवणे प्रसादवती । प्रस्तुतमभिधीयताम् ।

**माकन्दः** – स च वैश्रवणस्तदानीमेव तं मकरन्दं तमोगुहायां कृपाणेन (इत्यर्द्धोक्ते तूष्णीमास्ते । )

**तामरसः** – महान् वैश्रवणः, महती च भगवती गन्धमूषिका, तन्निमित्तमनार्यमिदमाचचार ।

**माकन्दः** – ( साक्षेपम् ) किमेवमपतुरोचितं वचः प्रपञ्चयसि ? ।

**अकृत्यमाचरत्येव सर्वः प्राण-धनेच्छया ।**
**महानेषोऽमहानेषः सैष भेदोऽन्यवस्तुषु ॥४॥**

**तामरसः** – तत् किमत्रार्थे धनलाभः कोऽपि ? ।

**माकन्दः** – सखे ! किं ममानेन प्रभुकौलीनप्रकाशनेन ? तत् कथय क्व प्रस्थितोऽसि ? ।

**तामरसः** – मल्लिकया चित्राङ्गदाकारणाय प्रेषितोऽस्मि ।

**माकन्दः** – व्रज तर्हि, अहमपि गन्धमूषिकायाः सविधमधितिष्ठामि ।

( इति निष्क्रान्तौ । )

**॥ विष्कम्भकः ॥**

( ततः प्रविशति चित्राङ्गदो मल्लिका च, कपिञ्जल-देवलक-मागधिकाप्रभृतिकश्च परिवारः )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चित्राङ्गदः** – ( मल्लिकामालोक्य सविनयम् )

**अङ्गं शिरीषमृदु काञ्चनकुम्भशोभां**
**मुष्णात्ययं स्तनयुगस्तबकावलेपः ।**
**वाचः सुधामुपहसन्ति जलोद्भवां तां**
**केनासि पुष्पधनुषोऽपि न मन्मथाय ! ॥५॥**

( पुनः सोपालम्भम् ) प्रिये ! विदग्धजनप्रकाण्डं तत्रभवती भवती । ततः कथं पामरजनोपलक्ष्येऽपि विशेषतो बाढं व्यामूढाऽसि ? । क्व चामी वयं विद्याधराः ? क्व चायं किराटकीटः ? । अप्रियभाषित्वं प्रथमं दौर्भाग्यकारणम्, कुतस्ततः प्रतिबान्धवं विप्रियाणि भाषितवती ? ।

**मल्लिका** – ( सलज्जम् ) [1]देवलय ! [कहय] अज्जउत्तस्स कारणं ।

**देवलकः** – कुमार ! इयं भर्तृदारिका पञ्चशैलद्वीपोपवने दुरात्मना वणिक्कीटेन केनापि मन्त्र–तन्त्रविधिना व्यामोहिता ।

**कपिञ्जलः** – ततस्ततः ? ।

**देवलकः** – ततः प्रभृति मातरमवजानाति, वरयितारमसूयति, सखीजनमवगणयति, प्रसाधनमहस्तयति, परिजनमभिक्रुध्यति ।

**चित्राङ्गदः** – ततस्ततः ? ।

**देवलकः** – ह्यस्तने दिने च भगवत्या गन्धमूषिकया केनापि कर्मणा व्यामोहप्रत्यूहमपनीय स्वास्थ्यमानीता सती मातरि वरयितरि सखीजने प्रसाधने परिजने च निर्व्याजं स्निह्यति ।

**चित्राङ्गदः** – ( सहर्षम् ) कपिञ्जल ! केन कर्मणा भगवत्या वयमानृण्यं गमिष्यामः ? ।

**मल्लिका** – [2]अज्जउत्त ! धन्ना खु दाणि अहयं भयवईए पसाएण ।

**सहजग्गिराण सहसोविराण सहहरिस-सोयवंताण ।**
**नयणाण व धन्नाणं आजम्ममकीत्तिमं पिम्मं ॥६॥**

**चित्राङ्गदः** – प्रिये प्रियंवदे !

---

१ देवलक ! [कथत] आर्यपुत्रस्य कारणम् ।

२ आर्यपुत्र ! धन्या खलु इदानीं अहं भगवत्याः प्रसादेन ।
सहजागृतॄणां सहस्वपितॄणां सहहर्ष-शोकवताम् ।
नयनानामिव धन्यानां आजन्म अकृत्रिमं प्रेम ॥३॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्पर्कपर्वणि सुधां वपुषि क्षरन्ती
सत्यं सुधांशुकिरणैः परिकल्पिताऽसि ।
मर्माणि मर्मरकणैर्विरहे भिनत्सि
तेनासि विह्निघटितेत्यपि मे वितर्कः ॥७॥

**मागधिका** – कुमार !

[1]निक्कारणपिम्मगहिल्लियाओ महिलाओ जाण गेहम्मि ।
ताण मणुआण मणुअत्तणे वि देवत्तरिद्धीओ ॥८॥

**कपिञ्जलः** – मागधिके ! अत्यल्पमभिदधासि । मल्लिकायां देवत्वमिति लघ्वी मात्रा ।

**चित्राङ्गदः** – ( सस्पृहम् )

मृदे तस्यै बद्धः करतलयुगेनाञ्जलिरयं
यया क्लृप्ताऽसि त्वं मनसिजवधूटीप्रतिकृतिः ।
स वेधा दुर्मेधाः खलु पुनरमार्गे कविगिरां
विधाय त्वां चक्रे न किल निजकान्तां सुदति ! यः ॥९॥

( मल्लिका सलज्जमधोमुखी भवति । )

**चित्राङ्गदः** – अपि च चन्द्रमुखि !

अभाग्यदोषः स रसातलस्य
न शेषकन्या भवती यदासीत् ।
त(? त्व)द्वक्त्रचन्द्रेऽसति तत्र सान्द्रं
तमोऽन्यथा कुत्र पदं लभेत ? ॥१०॥

**मल्लिका** – ( सात्त्विकभावानभिनीय ) [2]अज्जउत्त ! वणियतणया अहयं अणरिहा ईदिसाणं विन्नाणाणं ।

**चित्राङ्गदः** – ( साक्षेपम् ) मृगाक्षि ! नाद्यापि दुर्भाषितेभ्यो विरमसि ?

याता कामगवी दिवं व्यपहृता कादम्बरी दानवै-
र्नीता साऽपि सुरैः सुधा श्रितवती लक्ष्मीर्मुरारेरुरः ।
इत्थं स्वैरविहारशालिनि सुतावर्गे सुताकौतुकी
भूयस्त्वामजनिष्ट विष्टपदृशां पीयूषमम्भोनिधिः ॥११॥

---

१ निष्कारणप्रेमग्रथिला महिला येषां गृहे ।
तेषां मनुजानां मनुजत्वेऽपि देवत्वर्द्धयः ॥८॥

२ आर्यपुत्र ! वणिक्तनया अहं अनर्हा ईदृशानां विज्ञानानाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( मल्लिकाऽन्यतोऽवलोकयति । )

**चित्राङ्गदः** – मृगाक्षि ! कथं दिक्षु चक्षुषी निक्षिपसि ? मद्वक्त्रमालोकय ।

**मल्लिका** – [1]अज्जउत्त ! अत्तणो दुच्चरिदाइं समरंती न सक्केमि तुमं पिक्खिदुं ।

**चित्राङ्गदः** – ( सरोमाञ्चम् )

अयि ! जगति वदन्त्यां प्रेमगर्भं भवत्या
ध्रुवमवगतलज्जाः कोकिला व्याहरन्ते ।
सति च तव मुखेन्दौ निष्कलङ्के सदैव
प्रमदमयमगच्छन्नम्बुराशिर्जडात्मा ॥१२॥

**मल्लिका** – [2]अज्जउत्त ! खमेसु सव्वमवरद्धं, अवरं तुह चरणिक्कसरणा हं ।

**चित्राङ्गदः** – ( सहर्षगर्वम् ) शतपत्रलाक्षि !

अद्याभूवं खचरगणनापात्रमद्यास्मि दृष्टः
सन्तुष्टाभ्यां स्तिमितमनसा वेधसा लोचनाभ्याम् ।
देवस्यापि द्रुहिण-मुरजित्पार्वतीशस्तुतांहेः
कामस्याद्य ध्रुवमकरवं स्तोकमीर्ष्याभिषेकम् ॥१३॥

अपि च कलकण्ठीकण्ठि !

शास्त्रे त्वयि त्रिजगतो विजयैकशौण्डे
विख्यातधाम्नि हतके मसृणावलोकः ।
मथ्नाति किं न हरवैरमयं मनोभू-
रल्पीयसोऽपि समये सफलः प्रयत्नः ॥१४॥

( नेपथ्ये )

[3]साहु जंपिदं कुमार ! तुमए साहु ।

**मल्लिका** – ( विलोक्य ) [4]कधं एसा मनोरमा ? ।

( प्रविश्य )

**मनोरमा** – [5]साहु जंपिदं कुमार ! तुमए साहु । ( मल्लिकां प्रति ) भट्टिदारिए ! भयवई तुमं आदिसदि ।

---

१ आर्यपुत्र ! आत्मनः दुश्चरितानि स्मरन्ती न शक्नोमि त्वां प्रेक्षितुम् ।

२ आर्यपुत्र ! क्षमस्व सर्वमपराद्धम्, अपरं तव चरणैकशरणा अहम् ।

३ साधु जल्पितं कुमार ! त्वया साधु ।

४ कथमेषा मनोरमा ? ।

५ साधु जल्पितं कुमार ! त्वया साधु । भर्तृदारिके ! भगवती त्वां आदिशति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मल्लिका** – ( सविनयम् ) [1]किमादिसदि भयवई ! ।

**मनोरमा** – [2]समयवसेणं सव्वो वि पयत्तो तुह मणोरहाणुरूवो संवुत्तो । ता अणुहवसु तुमं वरेण समं कोउअकम्माइं ।

**चित्राङ्गदः** – ( साक्षेपम् ) मनोरमे ! भगवतीप्रसादेनेति वक्तव्यम्, न पुनः समयवशेन ।

**मल्लिका**–[3]मणोरमे ! कहिं दाणि भयवई अंबा य चिट्ठदि ? ।

**मनोरमा** –[4]जत्थ तुमं जाणासि ।

**चित्राङ्गदः**–( सोत्प्रासम्) अस्ति वणिग्डिम्भस्तेऽभ्यन्तरः ।

**देवलकः** – कुमार ! अपराधक्षमणायां किमुचितं मर्मोद्घाटनम् ? ।

**चित्राङ्गदः** – देवलक ! साधु शिक्षिता वयम् । लभ्यमस्मत्तो भवता किमपि पारितोषिकम् (पुनर्मल्लिकां प्रति सविषादम्)

**राधां गोपभवामकामयत तां लक्ष्मीं च यादोऽभजत्**
**कंसारिः पुरुषोत्तमः स भगवान् लोके तथापि श्रिये ।**
**श्रीविद्याधरवंशमौक्तिकमणिं त्वां वाञ्छतो द्वेष्टि नः**
**प्रेयांस्ते स पुनर्वणिक् कथमहो ! नानाविचारं जगत् ? ॥१९॥**

**मल्लिका** –[5]अज्जउत्त ! जइ तुमं वणियनामगहणं करेसि ता अहं गमिस्सं । (इति गन्तुमिच्छति)

(नेपथ्ये)

**तिष्ठ भर्तृदारिके ! मा गाः ।**

**मल्लिका** –[6]कहं एस तामरसो मं वारेदि ? ।

(प्रविश्य)

**तामरसः** – तिष्ठ, भर्तृदारिके ! मा गाः ।

**मल्लिका** – किं ति[7] ? ।

---

१ किमादिशति भगवती ? ।

२ समयवशेन सर्वोऽपि प्रयत्नः तव मनोरथानुरूपः संवृत्तः । तदनुभव त्वं वरेण समं कौतुककर्माणि ।

३ मनोरमे ! कुत्र इदानीं भगवती अम्बा च तिष्ठति ? ।

४ यत्र त्वं जानासि ।

५ आर्यपुत्र ! यदि त्वं वणिग्नामग्रहणं करोषि तद् अहं गमिष्यामि ।

६ कथं एष तामरसः मां वारयति ? ।

७ किमिति ? ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

तामरसः – भगवती गन्धमूषिका देवी चन्द्रलेखा च युवयोरित्यादिशति।

उभौ – (सविनयम्) किम् ?।

तामरसः – अस्ति दक्षिणेन सिद्धायतनस्य तमोराजी नाम कन्दरी ।

चित्राङ्गदः – ततः किम् ? ।

तामरसः – भगवद्धारिषेणपादपद्मोपसेवी कादम्बनामा यक्षाधिपतिः प्रतिमारूपेण तामधिवसति, ततस्तत्र युवाभ्यामागन्तव्यम् ।

चित्राङ्गदः – प्रत्यासीदति लग्नसमयः, किमावयोस्तत्रागमनमुचितम् ? ।

तामरसः – प्रथमं तत्र लग्नम्, अनन्तरमत्र ।

चित्राङ्गदः – (साक्षेपम् ।) तत् किमावयोर्द्विः परिणयनविधिः ? ।

तामरसः – कुमार ! सन्देशहरोऽहं नास्य पर्यनुयोगस्य पात्रम्, किमुत गन्धमूषिका चन्द्रलेखा च ।

( चित्राङ्गदः मल्लिकामुखमवलोकयति । )

देवलकः – कुमार ! विद्याधराणामीदृशः कुलाचारः ।

चित्राङ्गदः – कीदृशः ?

देवलकः – प्रथमं कन्यकायाः कादम्बकः पाणिं गृह्णाति । ततः पाणिपर्वणोऽनन्तरं वरः ।

चित्राङ्गदः – यदि कुलाचारस्तर्हि मुद्रितो विचारप्रचारः । कृतं कालविलम्बनेन । एते वयमागच्छामः । ( इति सर्वे परिक्रामन्ति । )

तामरसः – कुमार ! तदिदं सिद्धायतनम् , सेयं दक्षिणतस्तमोराजी ।

चित्राङ्गदः – ( साशङ्कम् ) प्रिये मल्लिके ! कथमिदानीं प्रमोदावसरे वामं चक्षुः स्फुरति ? ।

तामरसः – अन्धकारप्राग्भारदुर्लक्ष्यविषमोन्नतप्रवेशप्रदेशा तमोराजी, ततः स्थपुटाभिघातेनापि भाव्यम् ।

चित्राङ्गदः – यद्येतावानेव साम्प्रतमुदर्कः, तर्हि बद्धावधानैः प्रवेक्ष्यते ।

तामरसः – इत इतः ।

(सर्वे मध्यप्रवेशं नाटयन्ति)

चित्राङ्गदः – कथं दीपज्योतिषाऽपि न तादृशः प्रकाशो यादृशेन विस्पष्टा रूपव्यक्तिर्भवति ।

तामरसः – कुमार ! इयं भगवती गन्धमूषिका, इयं देवी चन्द्रलेखा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इयं मङ्गलकलशाध्यासिता विवाहवेदी, इयं च सम्मुखीना यक्षाधिपतेः प्रतिमा, एतौ च मनोरमा-वैश्रमणौ।

( ततः प्रविशन्ति यथानिर्दिष्टाः सर्वे । )

गन्धमूषिका—वत्स चित्राङ्गद! वत्से मल्लिके! प्रणमतां भवन्तौ भगवन्तं यक्षाधिराजम्।

( उभौ सबहुमानं प्रणमतः ।)

( मनोरमा स्मित्वा मल्लिकामुखमवलोकयति । )

मल्लिका – [1]हियय! समस्सस समस्सस। मणोरहा वि दे इत्तियं भूमिं न संपत्ता।

वैश्रवणः – भगवति! अहमिदानीं यक्षस्यानुचरः।

मनोरमा– [2]जइ एवं ता भट्टिदारियाए अहयं।

चित्राङ्गदः – (सहासम्) भगवति! किमिदानीं मया विधेयम्?।

गन्धमूषिका – कुमार! त्वया कपिञ्जलेन च साक्षिणा भाव्यम्। (पुनर्विमृश्य) तामरस! व्रज त्वं देवलक-मागधिकाभ्यां सह सौधतलम्। विधेहि कुमारविवाहोचितां सामग्रीम्। (इति तामरसो देवलक-मागधिकाभ्यां सह निष्क्रान्तः ।)

(प्रविश्य)

बटुः – ( गन्धमूषिकां प्रति ) भगवति! लग्नसमय इदानीम्। समाप्यतां कौतुकविधिः, प्रतिरुध्यतां कोलाहलः, अवधीयतां झल्लरीझात्कारः।

गन्धमूषिका – चन्द्रलेखे! विधेहि वधू-वरस्य प्रोक्षणादिकां क्रियाम्। मनोरमे! उपनय दधि-दूर्वा-ऽक्षतादीनि। ( उभे कुरुतः । )

गन्धमूषिका – वैश्रवण! परिधापय सद्दशान्यंशुकानि यक्षाधिराजम्, बधान मदनकडकं दक्षिणकलाच्याम्।

(वैश्रवणः सर्वमाचरति । )

गन्धमूषिका – कुमार! चन्द्रलेखे! फलार्थदानपूर्वकं उपनयतां यक्षाधिराजाय मल्लिकाम्।

चित्राङ्गद: – (प्रणम्य) भगवन्! परिणय मल्लिकामेताम्।

चन्द्रलेखा – भगवन्! प्रदत्ता मया तुभ्यं वत्सा। तथा प्रसीद यथा यावज्जीवमविधवा भवति।

---

१ हृदय! समाश्वसिहि। मनोरथा अपि ते इयतीं भूमिं न सम्प्राप्ताः।

२ यदि एवं तद् भर्तृदारिकाया अहम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(नेपथ्ये)

एष इदानीं लग्नसमयः ।

**गन्धमूषिका** – वैश्रवण ! प्रगुणय यक्षाधिराजस्य दक्षिणं करम् । (चन्द्रलेखां प्रति) त्वं पुनर्मल्लिकायाः ।

( उभौ तथा कुरुतः । )

(नेपथ्ये झल्लरीझात्कारः । )

पुण्याहं पुण्याहम् (–इत्युच्चारयति ।)

( चित्राङ्गद-चन्द्रलेखे वधू-वरस्य पाणी योजयतः । मनोरमा मङ्गलानि गायति । )

( प्रविश्य )

**देवलकः** – (गन्धमूषिकां प्रति) भगवति ! चित्राङ्गदलग्नसमय इदानीम् । ततः पाणिमोचनामाधाय त्वरिततरमागच्छत यूयम्–इति मौहूर्तिकाः शंसन्ति ।

**गन्धमूषिका** – ( ससम्भ्रमं चित्राङ्गदं प्रति) उत्क्षिप्य यक्षराजं मल्लिकया सह प्रदक्षिणीकारयत भगवन्तमाशुशुक्षणिम् ।

**चित्राङ्गदः** – (तथा कृत्वा) भगवति ! यक्षराजस्य मनुष्यशरीरनिर्विशेषः शरीरस्पर्शः ।

**गन्धमूषिका** – कुमार ! स्वर्गभूमिमृत्तिकाभिर्देवनिर्मितेयं प्रतिमा । ततः सम्भाव्यते स्पर्शसौभाग्यम् ! (पुनश्चन्द्रलेखां प्रति) प्रयच्छ यक्षराजाय पाणिविमोचनार्थं किमपि ।

**चन्द्रलेखा** – (प्रणम्य) परमेश्वर ! विमुञ्च वत्सायाः पाणिम् । दास्यामि तुभ्यं सुवर्णसहस्राभरणम् ।

**यक्षः** – (साक्षेपम्) किमिदमकुलीनोचितं व्याहरसि ? किमुचितं सधर्मचारिण्या विमोचनम् ? ।

**सर्वे** – (ससम्भ्रमं) कथमयं साक्षाद् यक्षराड् मनुष्यवाचा वदति ! ।

**चन्द्रलेखा** – (दीर्घं सन्निभाल्य) कथमेष मकरन्दः ? न कादम्बः ? । भगवति ! किमिदम् ? ।

**गन्धमूषिका** – वैश्रवण ! किमिदम् ? ।

**वैश्रवणः** – भगवति ! नाहमप्यवगच्छामि ।

**चित्राङ्गदः** – (विषादम्) कपिञ्जल ! किमिदमस्माकं व्रीडाकरं कर्म ? ।

**कपिञ्जलः** – कुमार ! इन्द्रजालमिव दृश्यते ।

**चन्द्रलेखा** – (वैश्रवणं प्रति) जातं यद् भाव्यम्, किं मां प्रतारयसि ? । अभयं ते, कथय परमार्थम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गन्धमूषिका – सार्थवाह ! मा भैषीः । अकुतोभयो भूत्वा प्रथय यथावस्थितां कथाम् ।*

**वैश्रवणः** – अहमनेन मकरन्देन पक्षिभावनरकादुद्धृत्य बाढमुपकृतः । मत्प्रीत्या च मनोरमया भगवती प्रसादिता । भगवत्या च विवाहसूत्रणामुपदिश्य स्थापनाव्याजेन मकरन्दोऽयं मह्यमुपनीतः । मया च कादम्बप्रतिमामपनीय मकरन्दो निवेशितः । अतः परं यद्भूत् तद् भवतामपि प्रत्यक्षम् । तदत्र कर्मणि भगवती नापराध्यति, न च मनोरमा, वैश्रवण एव केवलम् ।

**चित्राङ्गदः** – महापुरुषकृतज्ञचूडामणेर्भवतोऽपि कोऽपराधः ।

**गन्धमूषिका** – साधु कुमार ! साधु । महतामयमेव वाचां विक्रमः ।

**यथा भावि पुरा वस्तु तथा सर्वस्य वृत्तयः ।**
**इत्यवेत्य महात्मानो नापकारिषु रोषिणः ॥१६॥**

(पुनश्चन्द्रलेखां प्रति)

**वात्याभिर्वा प्रजाभिर्वा प्रभाभिर्वा खरत्विषः ।**
**भवेद्यथा तथा ग्रीष्मे सरसः शोषिता भ्रमः ॥१७॥**

यौवने सर्वत्रापि दुहितरो मातुरनायत्ताः । ततश्चित्राङ्गदे मकरन्दे वा जामातरि करते विशेषः । गुणगोत्राधिक्यभाषणं पुनरनुचितम् ।

**पुण्ये गुणश्च गोत्रं च न पुण्यं गुणगोत्रयोः ।**
**तद्विचारस्ततः पुंसि पुण्यशालिनि मत्सरः ॥१८॥**

मल्लिकासंभोगभाग्यं मकरन्दस्य न चित्राङ्गदस्य । ततः कृतं विषादेन ।

**चन्द्रलेखा** – भगवतीसूत्रिते कर्मणि को विषादः ।

**गन्धमूषिका** – (मकरन्दं प्रति) किं ते भूयः प्रियमुपकरोमि ।

**मकरन्दः** – अतःपरमपि प्रियमस्ति ? । तथापि भगवतीप्रसादानां पर्याप्तकामः ।

**गन्धमूषिका** – (सहर्षम्)

**जिनपतिपदप्रसादान्न(न्नु) रामचन्द्रांशुकुन्ददलविशदा- ।**
**मामाद्य यशोलक्ष्मीं परां स्वतन्त्रां चिरं भूयाः ॥१९॥**

(इति निष्क्रान्ताः सर्वे)

॥ षष्ठोऽङ्कः ॥

**॥ समाप्तमिदं मल्लिकामकरन्दाभिधानं नाम नाटकम् ॥**

कृतिरियं श्रीहेमचन्द्राचार्यचरणशुश्रूषाभिरतस्य प्रबन्धशतकर्तुः श्रीरामचन्द्रस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# मल्लिका-मकरन्दस्थपद्यानां मातृकावर्णक्रमेणानुक्रमणी


| पद्यप्रतीकम् | अंके पद्यम् | पृष्ठम् |
|---|---|---|
| अकाण्डकोपिनो भर्तुर् | ३. ३ | २४ |
| अकृत्यमाचरत्येव | ६. ४ | ५६ |
| अकृत्यं फलवद् येषां | ५.१२ | ४८ |
| अङ्गं शिरीषमृदु काञ्चन | ६. ५ | ४७ |
| अच्छरियं ते वि जियंति | ३.१८ | २९ |
| अणवरयं पूआहिं | १.१५ | ५ |
| अणुराओ च्चिय दइएसु | ३. १ | २३ |
| अत्यद्भुतं [कठिन ]कर्म | ४.१४ | ३७ |
| अद्याभूवं खचरगणना | ६.९३ | ५९ |
| अनादिसिद्धे मीमांसा | २. ९ | १६ |
| अन्नत्थ रागिणीओ | २.१५ | १८ |
| अन्योन्यं विषयाणां | ४.११ | ३६ |
| अपराधोऽपि सोढव्यो | २.१८ | २० |
| अप्पाण लाहवं चिय | ५.१९ | ५० |
| अभिशङ्कते जनोऽयं | ५.१० | ४७ |
| अभाग्यदोषः | ६.१० | ५८ |
| अमुमकृत यदङ्गनां न वेधाः | ३.१२ | २६ |
| अयमयमुपैषि जीवितान्तं | ५.२७ | ५३ |
| अयि कुवलयनेत्रे | ५.१८ | ५० |
| अयि जगति वन्दत्यां | ६.१२ | ५९ |
| अर्गला रक्षणे स्त्रीणां | ४. २ | ३४ |
| अर्थित्वमेकं नीचत्वम् | ४.१६ | ३९ |
| अर्थित्वेऽपि वयं तत्र | ४.१९ | ३९ |
| अर्थी पिताऽपि सन्तापम् | ४.१८ | ३९ |
| अवगणियव्वा वल्लह | ५. ७ | ४६ |
| अवरेहि वि कुवजलेहि | ३. ८ | २५ |
| असंतृप्ता विपद्यन्ते | ५. ९ | ४३ |
| असंभाव्यार्थलाभान्ता | ४.१३ | ३७ |
| आगन्तुकेन कार्यं | ३.२१ | २९ |
| आपदां स्कन्धमायोज्य | ५.२६ | ५३ |
| आस्यं हास्यकरं शशाङ्कयशसां | ४. ९ | ३६ |

| पद्यप्रतीकम् | अंके पद्यम् | पृष्ठम् |
|---|---|---|
| इदं कृत्यमकृत्यं वा | १.१६ | ६ |
| इष्टैरपि वियुक्तस्य | ४. १ | ३३ |
| उत्पातेषु महत्स्वपि | ३.१० | २६ |
| उन्मत्तप्रेमसंरम्भाद् | ३. ४ | २४ |
| एताः किन्नरगीतयः श्रुतिपथा | ३. ६ | २५ |
| एताः कुरङ्गकदृशः | ६. २ | ५५ |
| एदस्स देहलट्ठिं | २.११ | १७ |
| कर्पूरप्रभवस्यापि | ४.२४ | ४२ |
| काव्यैर्यत्र कविप्रथा धनलव | १. ८ | ३ |
| कुप्यामो व्यसने चिरं विरचिते | ३.८ (चतुर्थः चरणः) | ३ |
| कृत्रिमैर्डम्बरैर्बाह्यः | २.१७ | २० |
| केचिद्भोजनभङ्गिभिर्नरधियः | २. ६ | १३ |
| केयूराणि मृणालजानि कुचयोः | २.१० | १७ |
| कौपीनं वसनं कदन्नमशनं | १.१० | ३ |
| क्षणदृष्टेऽपि कुत्रापि | १.१३ | २६ |
| क्षौमाकल्पमयच्छदच्छविजुषः | ३. ६ | २५ |
| गीतमपि रक्तकण्ठैर् | ४.१२ | ३७ |
| चक्षुर्बाष्पविकज्जलं | २.१४ | १८ |
| चलकमलविलासा | २.१६ | १९ |
| जइ कह वि रई पिच्छिज्ज | २.१२ | १५ |
| जगतोऽपि यदिह निन्द्यं | ३.२० | २९ |
| जं किर उल्लसइ दढं | ५. ६ | ४५ |
| जम्मंतरलक्खपरूढ | ५. ५ | ४४ |
| जात्यन्तरस्थितवतीं | ५.२२ | ५१ |
| जात्यन्धाय च दुर्जनाय च जरा | ३.१९ | २९ |
| जिनपतिपदप्रसादान् | ६.१९ | ६४ |
| तं किं पि कामिणीणं | २.१ | ११ |
| तं चिय परमत्थेणं | ३. २ | २३ |
| तत तावदास्तां कामिन्यो | ४.२० | ४० |
| तथापि द्यूतकारस्य | १.११ | ४ |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

| पद्यप्रतीकम् | अंके पद्यम् | पृष्ठम् |
|---|---|---|
| तरुणान्तरादवाप्तं | ४. ४ | ३५ |
| तामसौ जनुषाऽन्धस्य | ५. ९ | ४९ |
| तावन्महत्त्वं पाण्डित्यं | ३.१५ | २७ |
| ताः सन्ति किं न शतशः | ४. ७ | ३६ |
| तृणेष्वपि गवादीनां | ४.१७ | ३७ |
| ददाति रागिणी प्राणान् | ६. ३ | ५५ |
| दम्पत्योः पाक्षिकात् प्रेम्णः | ६.१३ | ४८ |
| दरिद्रः क्षुत्पिपासाभ्यां | १.१४ | ५ |
| दात्यूहकुक्कुटकपि | ४. ८ | ३६ |
| दुत्था परव्वसा वाहिया य | १.१७ | ६ |
| द्वयं द्वयस्य सम्पत्ति (त्ते) | १. ३ | १ |
| द्विजन्मनः क्षमा मातुः | ३.२३ | ३१ |
| न रवेः कुमुदानि सुधा | ५. २ | ४३ |
| न स मन्त्रो न सा बुद्धिः | २. ५ | १२ |
| न सर्वकामुकापेक्षं | ३.१४ | २६ |
| नाम्नाऽपि यत्र सुदृशां | ३.१६ | २८ |
| निक्कारणपिम्मगहिल्लियाओ | ६. ८ | ६८ |
| नीरसानां पुरो नाट्यं | १. ४ | २ |
| पटुभिरपि नोपसर्पति | १. ३ | १ |
| पयांसि भूरुहां हेतुर् | २. ८ | १६ |
| परोपनीतशब्दार्थाः | १. ५ | २ |
| पुण्य[स्य] समिधः सत्य | ४. ३ | ३५ |
| पुण्ये गुणश्च गोत्रं च | ६.१८ | ६४ |
| पृच्छन्नसंस्तुतो गोप्यम् | १.१७ | ८ |
| पृथिव्यां वीरभोग्यायां | २.२१ | २२ |
| प्राणान् कार्यान्तरेणापि | ५.२३ | ५१ |
| प्राणानपि विमुञ्चन्ति | ४. ६ | ३६ |
| प्रायश्चित्तं नये वृत्तिः | १.१२ | ४ |
| प्रियानुरोधाद् बध्नाति | ६.११ | ४८ |
| मन्यावहे प्रभुरयं | ५.२१ | ५१ |
| मल्लिकाप्रेमजालेन | ५.२० | ५१ |
| मल्लिकाविशदां लक्ष्मीं | १. १ | १ |
| ६ | सावहित्थम् | Concealing (her) feelings-अवहित्थया सहितं यथा स्यात् तथा । "अवहित्थाकारगोपनम्" इति हैमः । |
| ३० | साशङ्कम् | With apprehension |
| २६ | साश्चर्यम् | With amazement, wonder |
| २७ | साश्रम् (? सास्रम्) | With tears |
| ३१ | सहायकम् | Assistance, help, aid |
| २५ | सिद्धान्तविदः | (विद् a at the end of comp, Knowing) Conversent with, versed in sacred canonical text-books or doctrines |
| २४ | सिद्धायतनम् | An eternal temple with the idol of Vāri-ṣeṇa in its adytum (गर्भगृहम्) A Jain temple |
| ४५ | सिद्धालयः-यम् | Same as सिद्धायतनम् above |
| १८ | (कीकस)सिरामात्रा | कीकसम् a bone, सिरा a vein, artery) Only a skeleton |
| १८ | सुदती | (From सुदत् a शोभना दन्ता अस्य सुदन्, सुदती f. i.e. youthful) Having handsome teeth, a pretty woman |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| २८ | सुदृश् *f.* | A pretty woman |
| ४४ | सुधांशुः | (nectar-rayed) the moon as the **supposed** repository of nectar |
| ४ | सुरतसंपरायः | The love-encounter (spot) the **encounter or** sport of amorous dalliance or sexual **plea**sure |
| २९ | सुवर्णद्वीप *m. n.* | (Golden island) proper name of an **island** (according to Jain geography) |
| १८ | सूत्कार | Producing the 'sūt' sound, sighs |
| २९ | सेर्ष्यारोषम् | With jealous anger |
| २८ | सोत्सुकम् | Eagerly curiously, With eagerness |
| ३६ | सोदरः (पीयूषस्य) | A uterine brother (of i.e. similar to **nector)** |
| २६ | सोपहासम् | With derision |
| ३२ | सोल्लुण्ठवादिनी | वादिन् *a*; speaking sarcastically, **ironically,** tauntingly |
| ३८ | सौधांस( ?श)व | (From सुधांशुः) Moon-light (lit. **The lustre** consisting of the necter-rays) |
| १४ | सौष्ठवम् | Goodness, excellence (of one's mind) |
| २६ | स्वगतम् | To himself |
| २६ | (यव)स्तम्ब | A clump, cluster, a sheaf of (**barley) corn** |
| ५३ | स्तब्ध *p p.* | Firm, stubborn |
| २३ | स्त्रीलोकः | Women-folk |
| २६ | (लतागृह–)स्थ | स्थ a. (at the end of comp.) Standing, **or se**ated (in the arbour) |
| ५१ | स्थगयितुम् *Inf.* | from the caus. of √स्थग् **to hide, con**ceal, cover |
| ६१ | स्थपुट० | Unevenly raised, elevated and **depressed** |
| १९ | स्मरः | Love |
| ५ | स्रजः | Plu. of स्रज् f. A chaplet, wreath of **garland** of flowers, especially one worn **on the head.** |
| १४ | स्वप्नम् | A dream |
| १५ | स्वर्गभूः | Heaven, the celestial world |
| २६ | स्वस्ति *ind* | (A particle meaning 'May it **be well** with (one'), hail ! |
| १८ | स्वस्था (भव) | (Be) of ease, comfortable |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| १० | स्वेच्छाचारिता | [from स्वेच्छाचार m. acting as one likes, doing what is right in one's own eyes] Behaving according to one's own free will. |
| ६ | हंहो *ind.* | A vocative particle corresponding to 'ho,' 'hello'. In dramas it is mostly used as a form of address by characters of the middling class |
| १९ | हला *ind.* | Vocative particle used in addressing a female friend (only in theatrical language) |
| १७ | हस्तावलम्बनम् | Support of the hand |
| २६ | हातव्य *pp.p.* | from √हा 3P To leave, abandon give up, forsake |
| २ | हास्य *a* | Laughable, ridiculous |
| २६ | हिमानी | A mass or collection of snow |
| २३ | हृदयविश्रामः | Rest or repose of one's heart |
| २३ | हृष्यन्ति | From √हृष् 4P to be delighted, be pleased or glad, exult or rejoice |
| ५३ | ह्यस्तनदिनम् | The previous day, yesterday |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयं परिशिष्टम् :

# मल्लिकामकरन्दनाटकान्तर्गतानि महाकविश्रीरामचन्द्रस्य सुभाषितानि

## रमणीयता

१ तं चिय परमत्थेणं रमणिज्जं जत्थ हिययवीसामो ।
हरिसंति असोयलया जेणं पायप्पहारेहिं ॥
( तद् एव परमार्थेन रमणीयं यत्र हृदयविश्रामः ।
हृष्यन्ति अशोकलताः येन पादप्रहारैः ॥ ( इति च्छाया ) —३. २

२ अन्योन्यं विषयाणां गुरुलघुभावो न कोऽपि यदि नाम ।
अन्यैव तदपि रेखा गीतीनां कामिनीनां च ॥ —४. ११

३ यद् यस्य नाभिरुचितं न तत्र तस्य स्पृहा मनोज्ञेऽपि ।
रमणीयेऽपि सुधांशौ न नाम कामः सरोजिन्याः ॥ —५.४

## रसिकारसिकौ

१ रसपीयूषपूरपूर्णचेतसः सुमेधसः पुरस्कृत्य महाकवयो नाटय-प्रबन्धानाबध्नन्ति । न पुनः कलगीतिकामिनीभ्योऽपि विमुखान् महासुभटोत्साहदर्शनेऽपि अरोमाञ्चकञ्चुकान् मातृ-पितृ-भ्रातृ-सुतविपत्तावप्यनार्द्रमानसान् निर्व्याजसेवकेऽप्यस्वीकृतवात्सल्यान् पाषाणसुहृदो दुर्मेधसः ।
—पृ.१–२

२ नीरसानां पुरो नाट्यं दुर्जनानां पदातिताम् ।
ग्राम्याणां वाग्मितां कुर्वन् हास्यो ब्रह्माऽपि जायते ॥ —१.४

३ प्रशमरसिकवैदुष्येण धर्मदेशनाविधानैकप्रगल्भवाचो वाचंयमाः शृङ्गार-हास्य-वीर-प्रमुख-रसमयानामनर्हाः खलु नाटयप्रबन्धानाम् । [नहि,नहि]
शमस्तत्त्वं मुनीन्द्राणां जानते तु जगन्त्यपि ।
जन्मैव दिवि देवानां विहारो भुवनेष्वपि ॥ —१.६

४ गीतमपि रक्तकण्ठैरुद्घटितं प्रीतये किल न येषाम् ।
पाषाणसोदराणां तेषामेषोऽञ्जलिर्बद्धः ॥ —४.१२

## प्रेम

१ तं किं पि कामिणीणं कत्थ वि पिम्मं जणम्मि निव्वडइ ।
झिज्जंति जेण डज्झंति जेण जेणं विवज्जंति ॥
[ तत् किमपि कामिनीनां कुत्रापि प्रेम जने संजायते ।
क्षीयन्ते येन दह्यन्ते येन येन विपद्यन्ते ॥ —इति च्छाया ] —२.१

२ रोगेऽपि विप्रयोगेऽपि शोकेऽपि व्यसनेऽपि च ।
क्षुत्-पिपासा-स्मराः प्रायो विमुञ्चन्ति न देहिनम् ॥ —२.२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३ अन्नत्थ रागिणीओ रच्चंति न वम्महे वि महिलाओ ।
[रुच्चइ न णाम राया वि तवणरत्ताण नलिणीणं ॥
अन्यत्र रागिण्यः रज्यन्ते न मन्मथेऽपि महिलाः ।
रोचते न नाम राजाऽपि तपनरक्ताभ्यो नलिनीभ्यः ॥ –इति च्छाया ] –२.१५

४ अणुराओ च्चिय दइएसु घडइ सोहग्गचंगिमगुणाइं ।
चंदु च्चिय जणइ मणीसु कढिणबंधेसु सलिलाइं ॥
[अनुराग एव दयितेषु घटयति सौभाग्य–चङ्गिम–गुणान् ।
चन्द्र एव जनयति मणीषु कठिन–बन्धेषु सलिलानि ॥ –इति च्छाया ] – ३.१

५ उन्मत्तप्रेमसंरम्भादारभन्ते यदङ्गनाः ।
तत्र प्रत्यूहमाधातुं ब्रह्मापि खलु कातरः ॥
[श्लोकोऽयं भर्तृहरिकृतशृङ्गारशतकाद्(७५)उद्धृतः ।] –३.४

६ वल्लहजणविरहीणं पाणपवासो वि बाहिरी किरिया ।
संताव–रुण्ण–गहिलत्तणाइ पुण कित्तियं कम्मं ॥
[ वल्लभजनविरहिणां प्राणप्रवासोऽपि बाह्या क्रिया ।
संताप–रुदित–ग्रहिलत्वादि पुनः कियत् कर्म ॥ इति च्छाया ॥ ] –३.९

७ तावन्महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता ।
यावज्ज्वलति नाङ्गेषु हतः पञ्चेषुपावकः ॥
[श्लोकोऽयं भर्तृहरिकृतशृङ्गारशतकाद् (७६)उद्धृतः ।] –३१५

८ अर्गला रक्षणे स्त्रीणां प्रीतिरेव निरर्गला ।
पदातिपरिवेषस्तु पत्युः क्लेशाय केवलम् ॥ –४.२

९ जम्मंतरलक्खपरूढदुक्खरुक्खस्स तिन्नि साहाओ ।
सेवा खलेसु, विहवो परेसु, पिम्मं अपिम्मेसु ॥
[जन्मान्तरलक्षप्ररूढदुःखवृक्षस्य तिस्रः शाखाः ।
सेवा खलेषु विभवः परेषु प्रेम अप्रेमसु ॥ इति च्छाया ॥ ] –५.५

१० जं किर उल्लसइ दढं अणुरायपरम्मुहेसु अणुराओ ।
तं चिय विसं विसं उण महणभवं तस्स पडिबिंबं ॥
[यत् किल उल्लसति दृढं अनुराग–पराङ्मुखेषु अनुरागः ।
तदेव विषं विषं पुनर्मथनभवं तस्य प्रतिबिम्बम् ॥ इति च्छाया ॥ ] –५ ६

११ प्रियानुरोधाद् बध्नाति विप्रियेऽपि जनो मनः ।
पङ्कभाजोऽपि हर्षाय वर्षाः सस्याभिलाषिणाम् ॥ –५.११

१२ दम्पत्योः पाक्षिकात् प्रेम्णः प्रेमाभावः सुखावहः ।
एककर्णस्थताडङ्कादताडङ्कं मुखं वरम् ॥ –५.१३

१३ यथा पुंसां स्त्रियः स्त्रीणां पुमांसो विषयस्तथा ।
तथापि सत्वराः प्रायः पुमांसो न पुनः स्त्रियः ॥ –५.१४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१४ सोहग्गं खु मिहुणनिबंधणं ।
[सौभाग्यं खलु मिथुननिबन्धनम् । इति च्छाया ॥ –५.१५–१६ (पृ ४९)

१५ ददाति रागिणी प्राणानादत्ते द्वेषिणी पुनः ।
रागो वा यदि वा द्वेषः कोऽपि लोकोत्तरः स्त्रियः ॥ –६.३

१६ सहजग्गिराण सहसोविराण सहहरिस–सोय वंताण ।
नयणाण व धन्नाणं आजम्ममकित्तिमं पिम्मं ॥
[सह–जागरितॄणां सह–स्वपितॄणां सह हर्ष–शोकवताम् ।
नयनानामिव धन्यानाम् आजन्म अकृत्रिमं प्रेम ॥ इति च्छाया ।।] ६.६

१७ शम्भु-स्वयम्भु–हरयो हरिणेक्षणनां
येनाक्रियन्त सततं गृहकुम्भदासाः ।
वाचामगोचरचरित्रपवित्रिताय
तस्मै नमो भगवते कुसुमायुधाय ॥ –१ १३

[भर्तृहरिविरचितशृङ्गारशतकाद् (१) उद्घृतः श्लोकोऽयम् ।]

### स्त्रियः

१ अहो प्रकृत्यैव कुपात्रे निर्बन्धः स्त्रीलोकस्य । ३.१–२, (पृ २३)

२ नाम्नाऽपि यत्र सुदृशां परमः कलङ्कः
तस्मै नमः शिवपथाय न तस्य चिन्ता ।
संसारवर्त्मनि पुनः सुदृशो विहाय
विघ्नो न किञ्चिदनघस्य सुखस्य बीजम् ॥ –३.१६

३ व्यसनं सौजन्यवतां कार्कश्यं योषितां श्रियां चलता ।
कार्पण्यं क्षोणिभृतां चत्वारि विधातुरधमानि ।। –३.१७

४ प्राणानपि विमुञ्चन्ति निबद्धप्रीतयः स्त्रियः ।
विद्वांसोऽपि जुगुप्सन्ते तास्तथापि कुतूहलम् ॥ ४.६

५ ताः सन्ति किं न शतशः शतशोऽपि पुम्भि·
रभ्यर्थिताः स्मरपदानि न याः स्मरन्ति ।
ते सन्ति नैव पुनरेणविलोचनानां
नाम्नापि ये प्रतिकलं विलयं न यान्ति ॥ –४.७

६ तत् तावदास्तां कामिन्यो न यत् साध्या धनैर्विना ।
धनैरपि न यत् साध्या तत्र किञ्चिद् विचिन्त्यताम् ।। –४.२०

७ प्रायेण नीचरतयो वनिताः.......–५.१६ (तृतीयः पादः)

८ न खलु दुरात्मनां स्त्रीणां कृत्यमकृत्यं वा किमप्यस्ति । -६. (पृ. ५५ पं. ३–४)

९ एताः कुरङ्गकदृशः प्रमदस्य बीज–
माद्यं यथा यदि तथा स्थिरचेतसः स्युः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मै पुराणपरिकल्पितगौरवाय
को नाम निर्वृतिसुखाय तदा यतेत । –६.२

१० निक्कारणपिम्मगहिल्लियाओ महिलाओ जाण गेहम्मि ।
ताण मणुआण मणुअत्तणे वि देवत्तरिद्धीओ ॥
[ निष्कारणप्रेमग्रहिला महिला येषां गृहे ।
तेषां मनुजानां मनुजत्वेऽपि देवत्वर्द्धयः ॥ इति च्छाया ॥ –६.८]

११ यौवने सर्वत्रापि दुहितरो मातुरनायत्ताः । —६.१७-१८ ( पृ. ६४ )

## वेश्याः

१ जात्यन्धाय च दुर्जनाय च जराजीर्णाखिलाङ्गाय च
ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय वा ।
यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया
पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रज्येत कः ॥
[भर्तृहरिविरचित शृङ्गारशतकाद्(५७) उद्धृतोऽयं श्लोकः । ] —३.१९

२ जगतोऽपि यदिह निन्द्यं तद् यासां धर्मकर्मवदनिन्द्यम् ।
तासां पणहरिणदृशां गवेष्यते किमपरं श्रेयः ॥ — ३.२०

३ द्विजन्मनः क्षमा मातुर्द्वेषः प्रीतिः पण्यस्त्रियः ।
नियोगिनश्च दाक्षिण्यमरिष्टानां चतुष्टयम् ॥ —३.२३

## द्यूत-व्यसनम्

१ न नाम द्यूतकाराः सभिको वा प्रसह्य मां दुरोदरकर्मणि व्यापारयन्ति । तदत्र प्राचीन-जन्मसहस्रोपार्जितानि दुष्कर्माण्येवापराध्यन्ति; न चाहम्, न च बाह्यो लोकः । — पृ. ३

२ कौपीनं वसनं कदन्नमशनं शय्या धरा पांशुला
जल्पोऽश्लीलगिरः कुटुम्बकजनो वेश्याः सहाया विटाः ।
व्यापाराः परवञ्चनानि सुहृदश्चौरा महान्तो द्विषः
प्रायः सैष दुरोदरव्यसनिनां संसारवासक्रमः ॥ — १.१०

३ तथापि द्यूतकारस्य पापध्वान्तान्धचेतसः ।
शक्रेऽपि रङ्कसंकल्पो द्यूतकर्मपराङ्मुखे ॥ — १.११

## कर्मवादः

भिन्नभिन्नवर्त्मनि संभविष्णवः सर्वेऽपि जन्तवस्तैस्तैः शुभैरशुभैर्वा कर्मभिः । विभिन्नरूपदेशानां जन्मान्तरेषु जन्मिनां कस्य केनाभिसंबन्धः । — ५.२३-२४ ( पृ ५२ )

## उदरपूरणदूषणम्

अच्छरियं ते वि जियंति ते वि पहसंति ते वि कीलंति ।
उयरभरणे वि पिच्छंति निच्चमवराण जे वयणं ॥
[ आश्चर्यं तेऽपि जीवन्ति तेऽपि प्रहसन्ति तेऽपि क्रीडन्ति ।
उदरभरणेऽपि प्रेक्षन्ते नित्यमपरेषां ये वदनम् ॥ इति च्छाया ॥ ] ३.१८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## संकीर्णसुभाषितानि

१) द्वयं द्वयस्य संपत्तेर्बीजमाद्यमखण्डितम् ।
संसारकर्मणां लक्ष्मीः प्रशमः शिवशर्मणाम् ॥—१.३

२) विनाऽभिप्रायदौरात्म्यं नापराधेऽपि गर्हितः ।
आचार्यो वाणि-पाणिभ्यां ताडयन्नपि पूज्यते ॥—१.५

३) सर्वाऽपि महती सिद्धिः क्लेशान्तरितसंभवा ।
विद्यावधूटीमाप्नोति सोढा काय-मनःक्लमान् ॥—१.९

४) प्रायश्चित्तं नये वृत्तिः श्लाघ्यमश्लाघ्यकर्मणः ।
शस्त्रादिभिस्तु पञ्चत्वमाततायिविचेष्टितम् ॥—१.१२

५) इदं कृत्यमकृत्यं वा कालदेशव्यपेक्षया ।
पराशोरात्मजस्यापि दहनं मङ्गलक्रिया ॥—१.१६

६) दुत्था परव्वसा वाहिया य अंधा य पियविउत्ता य ।
कह नाम लहिज्ज सुहं ? न हुज्ज भयवं जइ कयंतो ॥—
[ दुःस्थाः परवशा व्याधिताश्च अन्धाश्च प्रियवियुक्ताश्च ।
कथं नाम लभेत सुखं ? न भवेद् भगवान् यदि कृतान्तः ॥ [इति च्छाया १.१७]

७) प्रच्छन्नसंस्तुतो गोप्यमशक्तः कोपमावहन् ।
विरक्तां च स्त्रियं गच्छन् हास्यं कस्मै न यच्छति ॥—१.१९

८) सामत्थाभावेण अकएसु पओयणेसु को रोसो ।
वसहेसु दुद्धमहियं नएसु को नाम निव्वेओ ॥
[ सामर्थ्याभावेन अकृतेषु प्रयोजनेषु को रोषः ।
वृषभेषु दुग्धम् अहितं नयेषु को नाम निर्वेदः ? ॥ इति च्छाया— १.२०]

९) सुखं प्रकाशयते दौःस्थ्यं प्राच्यमारुढवैभवैः ।
आरूढदौःस्थ्यैर्दुःखेन प्राचीनं वैभवं पुनः ॥—१.२१

१०) श्रिया शक्त्या च साध्येऽर्थे सिद्ध्यभावे मनःक्लमः ।
उभाभ्यामप्यसाध्ये तु का नाम परिदेवना ॥—२.३

११) स्वीकृतापायसंपातः सर्वां सिद्धिं विगाहते ।
युद्धे हि प्राणसापेक्षो विपक्षैः परिभूयते ॥—२.७

१२) पयांसि भूरुहां हेतुर्न पुनर्गर्जितारवः ।
माघे तथापि गर्जन्ति क्षोभाय जनचेतसाम् ॥—२.८

१३) ववसाओ च्चिय पुरिसाणामणुवमो मंडणं सरीरस्स ।
रूवं पि पुणो जइ हुज्ज ता जियं हरिणनयणाहिं ॥
[व्यवसाय एव पुरुषाणामनुपमो मण्डनं शरीरस्य ।
रूपमपि पुनः यदि भवेत् तद् जितं हरिणनयनाभिः ॥ इति च्छाया ।—२.१३]

१४) कृत्रिमैर्डम्बरैर्बाह्यः शक्यस्तोषयितुं जनः ।
आत्मा तु वास्तवैरेव हृतोऽयं परितुष्यति ॥—२.१७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१५) अपराधोऽपि सोढव्यो वाञ्छितार्थविधायिनः ।
दहन्नप्यग्निना तुन्दं गुल्मिभिः पूज्यते भिषक् ।।-२.१८

१६) यावत् कुरङ्गनेत्रा तरुणी तरुणस्य दास्यमाधत्ते ।
वृद्धोऽपि तावदिच्छति न वीक्षते योग्यतामिच्छा ।।—२.२०

१७) पृथिव्यां वीरभोग्यां लक्ष्म्यां चाग्लयसंस्पृशि ।
स्त्रियां चाशक्यरक्षायां कस्य किं नाम नोचितम् ।।-२.२१

१८) अकाण्डकोपिनो भर्तुरन्यासक्तेश्च योषितः ।
प्रसत्तिश्चेतसः कर्तुं ब्रह्मणाऽपि न शक्यते ।।-३.३

१९) उत्पातेषु महत्स्वपि सुमेधसा जीवितं न हातव्यम् ।
सति जीविते कथञ्चिद् घटते किञ्चित् पुनः प्रेयः ।।३.१०

२०) क्षणदृष्टेऽपि कुत्रापि दृढं सज्जते मनः ।
बालस्तदात्वजातोऽपि जनन्याः स्निह्यति स्तने ।।-३.१३

२१) स्थातुं तेजस्विना शक्यं न जातिषु गतश्रिया ।
अस्तापास्तवपुर्भास्वान् नभस्तेन विमुञ्चति ।।-३.५२

२२) पुण्यस्य समिधः सत्य-दया-दान-प्रशान्तयः ।
अस्त्राऽग्नि-कण्ठपाशास्तु देहदुःखाय केवलम् ।।-४.३

२३) मानिनो मानिनस्तावद् यावद् यान्ति न दीनताम् ।
संसहेत न बन्धं यः केशरी केशरी हि सः ।। ४-२१

२४) वर्णानपेक्षं शौण्डीर्यं सत्त्वमात्रे निषीदति ।
सत्त्वं तु वणिजेऽपि स्यान्न स्यात् क्षत्रेऽपि च क्वचित् -४.२२

२५) कर्पूरप्रभवस्यापि प्रदीपस्यासिता मषी ।
विद्विषो विनतस्यापि प्रियमायाति विप्रियम् ।।-४.२४

२६) असंतृप्ता विपद्यन्ते विभवस्य विपश्चितः ।
रतस्य राजकामिन्यः स्वस्थस्य खलसेवकाः ।।-५.१

२७) आपदां स्कन्धमायोज्य स्तब्धाः सर्वत्र मानिनः ।
राजदण्डं हि पश्यन्तो धनं मुष्णन्ति दस्यवः ।।-५-२६

## मल्लिकामकरन्दस्थसूक्तयः

१ षड्भिरपि नोपसर्पति चतुर्भिरयं निष्प्रयोजनो लोकः ।-पृ १

२ पणीकृतप्राणसंपदां हि महौजसां किं नाम साध्यमसाध्यं वा ।-पृ ८

३ व्यसनान्धा हि प्राणव्ययेनापि धनार्थं प्रयोजनं साधयन्ति ।-पृ १२

४ अथवा व्यसनान्धमेवेदं जगत् । पृ १३

५ जीवंताण पुणो वि संगमो भविस्सदि ।
[जीवतोः पुनरपि सङ्गमो भविष्यति । इति छाया । ]-पृ २१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६ किं कहेमि ? विचित्ताओ मणोवित्तीओ ।
[ किं कथयामि ? विचित्रा मनोवृत्तयः । इति च्छाया । ]-पृ २३

७ आचक्षते हि शाश्वतिकानि दिव्यभूमिषु सिद्धायतनानि सिद्धान्तविदः । -पृ २५

८ न नाम सर्वाणि कर्माणि परिचयमपेक्षन्ते । -पृ २६

९ न प्रभवन्ति सिद्धायतनस्थायिनां क्षुद्रोपद्रवाः । -पृ ३१

१० न पहवंदि सिद्धालयनिवासीणं दुरिदाइं ।
[न प्रभवन्ति सिद्धालयनिवासिनां दुरितानि । इति च्छाया ।] -पृ ३५

११ कथाऽपि पापीयसां पुंसां महते कलुषाय प्रभवति । -पृ ३८

१२ अनिर्वहणे हि प्रारम्भो नीचतां प्रकाशयति । -पृ ३८

१३ यदि वा सामप्रयोगसाध्ये न दण्डप्रयोगः । -पृ ४२

१४ अहो गुणौघविमुखो दोषैकदृष्टिर्जनः । -पृ ४६

१५ सव्वस्स वि जणस्स अप्पा वल्लहो, न उण परो ।
[सर्वस्यापि जनस्य आत्मा वल्लभः, न पुनः परः । इति च्छाया ।] -पृ ५०

१६ अकृत्यमाचरत्येव सर्वः प्राणघनेच्छया । -पृ ५६

१७ मल्लिकायां देवत्वमिति लघ्वी मात्रा । -पृ ५८

१८ अलीयसोऽपि समये सफलः प्रयत्नः । -पृ ५९

१९ अहो नानाविचारं जगत् । -पृ ६०

२० यदि कुलाचारस्तर्हि मुद्रितो विचारप्रचारः । -पृ ६१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## तृतीयं परिशिष्टम् (३)

# प्रबन्धशतकारि-महाकवि-श्रीरामचन्द्रस्य नूतनकाव्यनिर्मिति विषये दर्पोक्तिः

(अ) नटः-(सरोषम्)

परोपनीतशब्दार्थाः स्वनाम्ना कृतकीर्तयः ।
निबन्धारोऽधुना तेन विश्रम्भस्तेषु कः सताम् ॥

सूत्रधार -(सावष्टम्भम्) अत्रार्थे स्वयमेव कविना दुर्मेधसां मुखबन्धः कृतः ।

काव्यैर्यत्र कविप्रथा धनलवक्रीतैरपि प्राप्यते
गुम्फक्लेशमुपासितुं कृतधिया कस्तत्र काले क्रमः ।
ग्रथ्नन्तस्तदपि प्रबन्धकुसुमान्याजन्म खिद्यामहे
कुप्यामो व्यसने चिरं विचरते, कस्मै परस्मै वयम् ॥ —मल्लिका १.७, ८

(आ) सूत्रधारः-(विहस्य) प्रकरणस्यास्य सरसतायां किमुच्यते । यतः--

प्रबन्धानाधातुं नवभणितिवैदग्ध्यमधुरान्
कवीन्द्रा निस्तन्द्राः कति नहि मुरारिप्रभृतयः ।
ऋते रामोन्नान्यः किमुत परकोटौ घटयितुं
रसान् नाट्यप्राणान् पटुरिति वितर्को मनसि नः ॥

अपि च--

प्रबन्धा इक्षुवत्प्रायो हीयमानरसाः क्रमात् ।
कृतिस्तु रामचन्द्रस्य सर्वा स्वादुः पुरः पुरः ॥ --कौमुदी १.३-४

(इ) सूत्रधारः-(सप्रमोदम्)

कविः काव्ये रामः सरसवचसामेकवसतिः

— — — — —

नटः-भाव, एतस्यां रामचन्द्रकृतौ संभाव्यते कोऽपि सामाजिकानां रसास्वादः ।

सूत्रधार :-मारिष, संभाव्यत इति किमुच्यते । यतः—

प्रबन्धानाधातुं नवभणितिवैदग्ध्यमधुरान्
कवीन्द्रा निस्तन्द्राः कति नहि मुरारिप्रभृतयः ।
ऋते रामान्नान्यः किमुत परकोटौ घटयितुं
रसान् नाट्यप्राणान् पटुरिति वितर्को मनसि नः ॥

अपरं च—

प्रबन्धा इक्षुववत् प्रायो हीयमानरसाः क्रमात् ।
कृतिस्तु रामचन्द्रस्य सर्वा स्वादुः पुरः पुरः ॥

— — — — —

नट :— ( विमृश्य ) भाव, अयं कविः स्वयमुत्पादक उताहो परोपजीवकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सूत्रधार :**— अत्रार्थे तेनैव कविना दत्तमुत्तरम् —

जनः प्रज्ञाप्राप्तं पदमथ पदार्थं घटयतः
परार्ध्वाध्वन्यान् नः कथयतु गिरां वर्त्तनिरियम् ।
अमावास्यायामप्यविकलविकासीनि कुमुदा—
न्ययं लोकश्चन्द्रव्यतिकरविकासीनि वदति ।।

अपि च शपथप्रत्येयपद-पदार्थसंबन्धेषु प्रीतिमादधानं जनमवलोक्य जातखेदेन तेनेदं चाभिहितम् —

स्पृहां लोकः काव्ये वहति जरठैः कुण्ठिततमै-
र्वचोभिर्वाच्येन प्रकृतिकुटिलेन स्थपुटिते ।
वयं वीथिं गाढुं कथमपि न शक्ताः पुनरिमा—
मियं चिन्ता चेतस्तरलयति नित्यं किमपि नः ।। नल० १. २-८

**ई ) सूत्रधार :**— ....( विहस्य ) सरसतायां किमुच्यते प्रबन्धस्य । यतः —

व्युत्पत्तिर्मुखमेव नाटकगुणव्यासे तु किं वर्ण्यते
सौरभ्यप्रसवा नवा भणितिरप्यस्त्येव काचित् क्वचित् ।
यं प्राणान् दशरूपकस्य स कवेरुत्क्षेपं समाचक्षते
साहित्योपनिषद्विदः स तु रसो रामस्य वाचां परम् ।।

किं च । प्रबन्धा इक्षुवत्प्रायो हीयमानरसाः क्रमात् ।
कृतिस्तु रामचन्द्रस्य सर्वा स्वादुः पुरः पुरः ।।

अपि च । कोऽप्येष वः परमहर्षोत्सवो वर्तते । तदवधीयतां क्षणमेकम् ।
सूक्तयो रामचन्द्रस्य वसन्तः कलगीतयः ।
स्वातन्त्र्यमिष्टयोगश्च पञ्चैते हर्षवृ( सृ )ष्टयः ।। सत्यहरिश्चन्द्रनाटके १.३-५

**उ) सूत्रधार :**— --- अकाण्डप्रसन्नचेतसा वेधसा तत्रभवतां भवतां सोऽयमिदानीमुपनीतः प्रमोदप्रकर्षः ।

यतः—

सूक्तयो रामचन्द्रस्य पूर्णेन्दुः कलगीतयः ।
स्वातन्त्र्यामिष्टयोगश्च पञ्चैता हर्ष वृ ( सृ ) ष्टयः ।। निर्भयभीमव्यायोगः १.२

ऊ ) प्राणाः कवित्वं विद्यानां, लावण्यमिव योषिताम् ।
त्रैविद्यवेदिनोऽप्यस्मै, ततो नित्यं कृतस्पृहा : ।।
अकवित्वं परस्तावत् कलङ्कः पाठशालिनाम् ।
अन्यकाव्यैः कवित्वं तु कलङ्कस्यापि चूलिका ।।
नाट्यदर्पणविवृतिप्रारम्भे, ९,११( पृ२२ )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परोपनीतशब्दार्थाः स्वनाम्ना कृतकीर्तयः ।
निबद्धारोऽधुना तेन को नौ क्लेशमवेष्यति ॥
शब्दलक्ष्म-प्रमालक्ष्म-काव्यलक्ष्म-कृतश्रमः ।
वाग्विलासस्त्रिमार्गो नौ, प्रवाह इव जाह्नुजः ॥ नाट्यदर्पणविवृतिप्रान्ते २,४

ए ) विद्वानपि यथा हास्यः परकाव्यैः कविर्भवन्–जिनस्तोत्रे

ऐ ) पञ्चप्रबन्धमिषपञ्चमुखानकेन विद्वन्मनःसदसि नृत्यति यस्य कीर्तिः ।
विद्यात्रयीचणमचुम्बितकाव्यतन्द्रं कस्तं न वेद सुकृती किल रामचन्द्रम् ॥ रघुविलासे १.३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## परिशिष्टम्-४

# महाकविश्रीरामचन्द्रविरचितकतिपयनाटकानां रसग्रहणम्

(१) स रामः कविरुद्दामः प्रबन्धाब्धिं प्रबध्य यः ।
प्रियां चमत्कृतिं प्रत्याहरति प्रीणयति क्षमाम् ॥

——माणिक्यचन्द्रसूरिः (शान्तिनाथमहाकाव्ये)

(२) कविनो भाषाविभव समृद्ध छे, सर्वत्र वैदर्भी रीति छे एटले वांचवामां पण सरलता माधुर्य प्रसाद सारां जणाय छे. पण मानवस्वभावना जे गंभीर निरूपणथी, कोइ महान महान सत्यना दर्शनथी, के रसनी कोइ पराकोटिथी कविओ अमरत्व प्राप्त करे छे ते तो आमां नथी एमज कहेवुं जोइए. कविओना प्रथम वर्गमां आने न मूकी शकाय पण गूजरातना १३ मा सैकामां आवुं नाटक लखायुं-भजवायुं पण हशे—तेने माटे गूजरात मगरूर जरूर थई शके.

——रामनारायण पाठक : नलविलास नाटक (जैन साहित्य संशोधक, खंड ३, अंक २, अहमदाबाद १९८३)

(Free Translation : The poet's vocabulary is rich. He employs throughout the play the Vaidarbhī style. Naturally, when reading, it reveals the qualities of simplicity, sweetness, and lucidity. But it must be said that it fails to display a profound knowledge of human nature or his vision of great Truth, or his power of developing *rasa* to its zenith — the qualities which entitle a poet to immortality. True, he cannot be placed in the rank of first-rate poets but such a play could be written — and might have been even staged — in the 13th century is a matter of which Gujarat can be legitimately proud.)

3) Rāmacandra, pupil of the great Hemacandra..wrote, besides other plays, the *Kaumudīmitrāṇanda* in ten Acts. The work is wholly undramatic and is really the working up in the form of a play of a number of Kathā incidents, presenting a result not unlike the plot of a modern pantomime... The work is, of course, wholly without interest other than that presented by so many marvels appealing to the sentiment of wonder in the audience.

— Keith : The Sanskrit Drama, pp.258–259.

It *(Kaumudī-mitrāṇanda)* is typical of the later play of this kind in having a complicated series of narrative, rather than dramatic, incidents..... The story resembles those of Daṇḍin's *Daśakumāra-Carita*, and the author might have done well if he had attempted to write in the same strain and

Jain Education International For Private & Personal Use Only www.jainelibrary.org

form; for there is not much merit in the play as a dramatic piece, nor is it remarkable on the poetic side.

— De : History of Sanskrit Literature, pp. 475–76

The other (than Kṣemendra) polymath Rāmacandra, pupil of the Jain Ācārya Hemacandra, has left behind *Nalavilāsa,* a Nāṭaka in seven acts, on the well-worn story of Nala, and the *Nirbhaya-bhīma,* a one-act Vyāyoga on the story of the slaying of the Baka demon; but both are laboured compositions by one who was well-versed in dramaturgic rules."

Ibid, p.465

4) Thus Kaumudī-mitrāṇanda on the whole does not make a very impressive drama or a specially noteworthy specimen of the class of Prakaraṇas as one finds there a mere assemblage of many incidents and motifs of wonder and danger.

— Dr. V. Raghawan : The Social Play in Sanskrit, p.12

5) "Rāmacandra seems to have been inspired to build his plays on the classical model. The influence of the masters is unmistakable...... It is in this respect (of characterisation and motivation of actions and events) that Rāmacandra's plays appear to be weak. Some of his motivation is not fully convincing; and so his characterization suffers. The principal characters in his plays appear to have no will of their own. They seem to lack perspective and judgment. The minor characters are usually built on conventional lines and hardly any one of them would linger in our memory.

At the same time it must be made clear that Rāmacandra appears a lesser artist only in comparison with the masters. He has enough sense of drama to build scenes that have emotional interest and dramatic tension. He has an eye for dramatic construction too; though his causal links are weak or unconvincing sometimes."

— Two plays (Nirbhaya-Bhīma-Vyāyoga and Nalavilāsa-nāṭaka) of Rāmacandra : An Aesthetic Study by G.K. Bhat.

6) It is recommended that the readers may read with profit Rāmacandra as a Dramatist and Poet' (pp,223–244) from the *Nāṭyadarpaṇa of Rāmacandra and Guṇacandra : A Critical Study* by Dr. K. H. Trivedi, pub, by L.D. Institute of Indology, Ahmedabad, 1966.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## पञ्चमं परिशिष्टम् (५)

# श्रीभर्तृहरिकृतशृङ्गारशतकात् मल्लिकामकरन्दनाटके समुद्धृताः कतिपयाः श्लोकाः

(१) शम्भु-स्वयम्भु-हरयो हरिणेक्षणानां
येनाक्रियन्त सततं गृहकुम्भदासाः ।
वाचामगोचरचरित्रपवित्रिताय
तस्मै नमो भगवते कुसुमायुधाय ॥ —मल्लिका १.१३
तुलनाः शृङ्गारशतकम्. १.

(२) तावन्महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता। ।
यावज्ज्वलति नाङ्गेषु हतः पञ्चेषुपावकः ॥ —मल्लिका ३.१५
तुलनाः शृङ्गारशतकम्. ७६

(३) जात्यन्धाय च दुर्जनाय च जराजीर्णाखिलाङ्गाय च
ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय वा ।
यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया
पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रज्येत कः ॥ —मल्लिका ३.१९
तुलनाः शृङ्गारशतकम्. ५७

(४) यद् यस्य नाभिरुचितं न तत्र तस्य स्पृहा मनोज्ञेऽपि ।
रमणीयेऽपि सुधांशौ न नाम कामः सरोजिन्याः ॥ —मल्लिका ५.४
तुलनाः शृङ्गारशतकम्. १०५

रघुविलासे च कौमुदीमित्राणन्दे च
वक्त्रं चन्द्रविलासि पङ्कजपरीहासक्षमे लोचने
वर्णः स्वर्णमपाकरिष्णुरलिनीं जिष्णुः कचानां चयः ।
वक्षोजाविभकुम्भविभ्रमकरौ गुर्वी नितम्बस्थली
वाचां मार्दवमुज्ज्वलं युवतिषु स्वाभाविकं मण्डनम् ॥ —रघु. २.६
—कौमुदी ७०९ तुलनाः शृङ्गारशतकम्. ५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# षष्ठं परिशिष्टम् (६)

## महाकविश्रीरामचन्द्रस्य नाटकान्तरेषु समुपलभ्यमानाः मल्लिकामकरन्दनाटकस्थाः कतिपयाः श्लोकाः गद्यांशाश्च

१) सुवर्णद्वीपवासी जिनदत्तनामा क्रमागताद्भुतवैभवः परमधार्मिकप्रकाण्डं वणिगस्ति ।
मल्लिका० पृ.२७
कौतुकमङ्गलनगराधिवासिनः क्रमागताद्भुतवैभवस्य जिनदासनाम्नः परमधार्मिकप्रकाण्डस्य वणिजो मित्राणन्दनामा सूनुरहम् । –कौमुदी पृ ८

२) परोपनीतशब्दार्थाः स्वनाम्ना कृतकीर्तयः ।
निबन्धारोऽधुना तेन विश्रम्भस्तेषु कः सताम् ।। –मल्लिका० १.७
परोपनीतशब्दार्थाः स्वनाम्ना कृतकीर्तयः ।
निबद्धारोऽधुना तेन विश्रम्भस्तेषु कः सताम् ।।–कौमुदी १.५

३) विधातुं संपदो हर्तुमापदश्च न निश्चयः ।
मनस्तु मे सदाऽप्यन्यदुःखसंक्रान्तिदर्पणः ।।–मल्लिका० १-१८
कौमुदी० २.६

४) न स मन्त्रो न सा बुद्धिः न च दोष्णां पराक्रमः ।
अपुण्योपस्थितं येन व्यसनं प्रतिरुध्यते ।।–मल्लिका २.५
–नलविलास १.९

५) दात्यूह–कुक्कुट–कपिञ्जलचक्रवाक....
... ... .... ... ... ... रमयन्ति चेतः ।। -मल्लिका० ४.८
–नल० १.१२

६) चक्षुर्बाष्पविकज्जलं ....
.... ... लेखेव शीतत्विषः ।। – मल्लिका० २.१४
– कौमुदी० १०,९

७) चलकमलविलासाभ्यासिनी नेत्रपत्रे
... .... ... मोदते गण्डभित्तिः ।। –मल्लिका० २.१६
–कौमुदी० ८.८
–नल० २.५
–रघु० ५.५

८) अणुराओ च्चिय दइएसु .... ..
.... कढिणवंधेसु सलिलाइं ।।–मल्लिका० ३.१
एसो सो च्चिय दइएसु ....
... वाणीसु (? मणीसु) कढिणवंधिसु (? कढिणवंधेसु) सलिलाइं ।। कौमुदी ३.९

९) संपत्तिरस्य रोहन्ती भाग्यानां मुखमीक्षते ।
स्वशक्तितोलनं नाम माहात्म्यं तु महात्मनाम् ।। –मल्लिका० ४.१५
संपत् परस्य रोहन्ती भाग्यानां सुख(? मुख)मीक्षते ।
... ... ... महात्मनाम् ।।–कौमुदी० २.८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१०) अकाण्डकोपिनो भर्तु .... ।
.... ब्रह्मणा पि न शक्यते ॥—मल्लिका० ३.३
—नल० ४.७

११) कथं पञ्चमोद्गारसारः समापतति गीतामृतासारः ।—मल्लिका० ४.१०-११
जानीहि कुतस्त्योऽयं पञ्चमोद्गारसारः समुच्छलति गीतामृतासारः ।—नल० ३.११-१२

१२) भद्रे सरलहृदयाऽसि । भिन्नभिन्नवर्त्मनि संभविष्णवः सर्वेऽपि जन्तवस्तैस्तैः शुभैरशुभैर्वा कर्मभिः । विभिन्नरूपदेशानां जन्मान्तरेषु जन्मिनां कस्य केनाभिसंबन्धः ।
—मल्लिका० ५.२३-२४
अपि च मुग्धे किं पावकदग्धैः स एव प्रियः प्राप्यते । तैस्तैः शुभैरशुभैर्वा कर्मभिर्भिन्नवर्तिनीसंचरिष्णवः सर्वे जन्तवः । —नल० ७.६-७

१३) हियय ! समस्सस समस्सस । मणोरहा वि दे इत्तियं भूमिं न संपत्ता ।
—मल्लिका ६.१५-१६ (पृ. ६२)

हियय ! समस्सस समस्सस । मणोरहा वि दे इत्तियं भूमिं न संपत्ता ।
—रघु० ८.२६-२७ (पृ. ८३)

१४) लग्नसमय इदानीम्, समाप्यतां कौतुकविधिः । प्रतिरुध्यतां कोलाहलः, अवधीयतां झल्लरीझात्कारः ।
....विधेहि वधूवरस्य प्रोक्षणादिकां क्रियाम् । ...उपनय दधि—दूर्वाक्षतादीनि ।
....फलार्थ(? फलार्घ)दानपूर्वकम् उपनयतां यक्षाधिराजाय मल्लिकाम् ।
....तथा प्रसीद यथा यावज्जीवमविधवा भवति ।
....मल्लिकया सह प्रदक्षिणीकारयत भगवन्तमाशुशुक्षणिम् ।
मल्लिका० (पृ. ६२—६३)

अर्घदानपूर्वकं प्रयच्छ पुत्रीं जामात्रे ।
.... ....लग्नसमय इदानीम्, ततः समाप्यतां कौतुकविधिः । प्रतिरुध्यतां कोलाहलः । अवधीयतां झल्लरीझात्कारे (? झात्कारः) ।
.... ...( सर्वे सानन्दं वधूवरस्य शिरसि दूर्वाक्षतादीनि प्रक्षिपन्ति । )
.... ... (वधूवरं प्रति) प्रदक्षिणीकुरुतां भगवन्तं परिणयनसाक्षिणमाशुशुक्षणिम् ।
—कौमुदी ३. १४—१५ (पृ. ३६)

१५) .... .... ....रामचन्द्रांशुकुन्ददलविशदा— ।
मासाद्य यशोलक्ष्मीं परां स्वतन्त्रतां चिरं (? स्वतन्त्रश्चिरम्) भूयाः ॥
—मल्लिका० ६.१९

.... .... ....संतप्तारामचन्द्रकरविशदाम् ।
आसाद्य यशोलक्ष्मीं परां स्वतन्त्रश्चिरं भूयाः ॥
—कौमुदी १०.१८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## सप्तमं परिशिष्टम् (७)

# मल्लिका-मकरन्द-नाटके प्रयुक्तानां वृत्तानां सूची-पत्रम्

१. अनुष्टुप् श्लोक :

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥

१. १, ३, ४, ५, ६, ७, ९, ११, १२, १४, १६, १८, १९, २१

२. २, ३, ५, ७, ८, ९, १७, १८ १९

३. ३, ४, ११, १३, १४, १५, २२, २३, २४

४. १, २, ३, ६, १३, १५, १६, १७, १८, १९, २०, २१, २२, २३, २४

५. १, ९ ११, १२, १३, १४, २०, २३, २६, २८

६. १६, १७, १८

(साकल्येन : ६१)

२. आर्या :

यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या ॥

१. २

२. २०

३. १०, १७, २०, २१

४. ४, ११, १२

५. २, ३, ४, १०

६. १९

( साकल्येन : १४ )

३. गाहा (गाथा) :

पढमं बारह मत्ता बीए अट्ठारहेहिं संजुत्ता ।
जह पढमं तह तीअं पंचदसविहूसिआ गाहा ॥
[ "आर्या" एव गाथेत्युच्यते प्राकृते । ]

१. १५, १७, २०, २२

२. १, ११, १२, १३, १५

३. १, २, ८, ९, १८

४. ५

५. ५, ६, ७, १९

६. ६, ८

(साकल्येन : २१ )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४ उपेन्द्रवज्रा :

उपेन्द्रवज्रा जतजास्ततो गौ ।

६. १०

( साकल्येन : १ )

५ प्रमिताक्षरा :

प्रमिताक्षरा सजससैः कथिता ।

२. ४

( साकल्येन : १ )

६ वसन्ततिलका :

उक्ता वसन्ततिलका तभजा जगौ गः ।

१. १३,

३. १६

४. ५. ८, १४

५. १५ १६, २१, २२

६. २, ५, ७, १४

(साकल्येन : १३)

७ मालिनी :

ननमयययुतेयं मालिनी भोगिलोकैः ।

२. १६

५. १७, १८

६. १२

( साकल्येन ; ४ )

८ पृथ्वी :

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।

५. २४, २५

( साकल्येन : २ )

९ मन्दाक्रान्ता :

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।

६. १३

( साकल्येन : १ )

१० शिखरिणी :

रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।

६. ९

( सकल्येन : १ )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**११ शार्दूलविक्रीडित :**

सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ।

१. ८, १०

२. ६, १०, १४

३. ५, ६, ७, १९

४. ९, १०

५. ८

६. १, ३, ४, ११, १५,

( साकल्येन : १७ )

**१२ पुष्पिताग्रा (अथवा) औपच्छन्दसिक :**

अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा ।

३. १२

५. २७

( साकल्येन : २ )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अष्टमं परिशिष्टम् (८)

## मल्लिकामकरन्दनाटकगता अलङ्काराः काव्यप्रकाशोक्तलक्षणसहिताः

(१) साधर्म्यमुपमा भेदे ।
२.१४, २.३६, ४.९, ५.१०, ६.६

(२) संभावनमथोत्प्रेक्षा प्रकृतस्य परेण यत् ।
४.१०

(३) तद् रूपकमभेदो य उपमानोपमेययोः ।
१.८, १.१८, ३.१५, ४.२, ४.३, ४.९

(४) प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः ।
(अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः । –कुवलयानन्दे)
५.६

(५) अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ।
६. १७

(६) निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥
कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयाऽतिशयोक्तिः सा
१.४, ६.२, ६.११, ६.१३

(७) दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ।
१.६, ३.२४, ४.१३, ४.१८, ४.२४, ५.९

(८) सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥
१.१७, १.१९, ३.३, ३.१७, ४.१, ५.१

(९) नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ।
१.३

(१०) उपमानाद् यदन्यस्य व्यतिरेकः स एव सः ।
२.१६, ४.९, ४.१७, ४.२० ५.२०, ६ ५, ६.१२

(११) विशेषोक्तिरखण्डेषु कारणेषु फलावचः ।
५.३

(१२) सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥
१.५, १.९, १.१४, १.१६, १.२०, २.४, २.७, २.१५, २.१८
२.२०, ३.१, ३.२ ३.१३, ३.१४, ३.२२, ४.५, ४.१४,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४.२१, ४.२२, ५.४, ५.७, ५.८, ५.११, ५.१३, ५.१९, ५.२६,
६.४, ६.१४, ६.१५

(१३) विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः ।
१.२१, ३.१६, ४.७, ४.१५, ४.२३

(१४) काव्यलिङ्गं हेतोर्वाक्यपदार्थता ।
१.२, २.१०, ३.६, ३.१०, ४.१९, ५.७, ६.९, ६.१६

(१५) पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः ।
४.१२, ५.१७

(१६) उदात्तं वस्तुनः संपत् महतां चोपलक्षणम् ।
६.८

(१७) तत्सिद्धिहेतावेकस्मिन् यत्रान्यत्तत्करं भवेत् ।
समुच्चयोऽसौ
१.१०, २.१४, ३.१७, ३.२३, ५.५, ६.१७

(१८) विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः ।
५.२८, ६.१२

(१९) समं योग्यतया योगो यदि संभावितः क्वचित् ।
५.२३

(२०) क्वचिद् यदतिवैधर्म्यान्न श्लेषो घटनामियात् ।
कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद् भवेत् ॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ।
क्रमेण च विरुद्धे यत् स एष विषमो मतः ॥
५.१५, ५.२२

(२१) सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः ।  ——कुवलयानन्दे
१.१, ६.१८

(२२) लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते ।
२.१५, ५.१६

(२३) वर्णसाम्यमनुप्रासः ।
१.३, २.७, २.१४, ३.५, ५.२२, ६.७७

---

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## नवमं परिशिष्टम् (९)

# मल्लिकामकरन्द–नाटके महाकविश्रीरामचन्द्रेण प्रयुक्तानां विरलदृष्टानाम् अभिनवशब्दानां सूची

| | | | |
|---|---|---|---|
| सकर्णकर्णकोटर | (पृ१) | पाषाणसोदरः | (पृ३७) |
| पाषाणसुहृदः | (पृ२) | प्रतिहस्तकः | (पृ३८) |
| मुखबन्धः | (पृ३) | प्राभंहर | (पृ३८) |
| झात्कारः | (पृ४) | बुभुक्ष्यन्ती | (पृ३८) |
| वैशसम् | (पृ७) | अपकर्णितवान् | (पृ३८) |
| सत्यङ्कारः | (पृ९) | वाचाटकिराटः | (पृ४१) |
| कटरि | (पृ१३) | तरवारिः | (पृ४२) |
| कलाचिका | (पृ१५) | बहिर्मुखा | (पृ४४) |
| गात्रावनिः | (पृ१८) | दन्तचूडाप्रवेश० | (पृ४६) |
| सत्यङ्कारितः | (पृ१९) | बुद्धि (अर्थम्) | (पृ४६) |
| डम्बरः | (पृ२०) | कृपणरत्नम् | (पृ४९) |
| जीवितप्रवासकरणम् | (पृ२१) | अप्रसादापवादः | (पृ५०) |
| चङ्किम० | (पृ२३) | चारिमा | (पृ५०) |
| ग्रहिलत्वम् | (पृ२५) | चाटनम् | (पृ५०) |
| परमधार्मिकप्रकाण्डम् | (पृ२८) | दुग्धमुग्धनेत्रा | (पृ५२) |
| परमुखप्रेक्षः | (पृ२८) | रामणीयकम् | (पृ५२) |
| अप्रसादातिरेकः | (पृ२९) | कृतान्तातिथिः | (पृ५२) |
| निर्भाग्यशेखरः | (पृ२९) | उपलिङ्गम् | (पृ५३) |
| औपयिकम् | (पृ३०) | पारिप्लवता | (पृ५५) |
| कौमारकुलटा | (पृ३२) | अपहस्तयति | (पृ५७) |
| ग्रहिला | (पृ३३) | मर्मुरः | (पृ५८) |
| गुटिकाप्रयोगः | (पृ३३) | शतपत्रलाक्षी | (पृ५९) |
| प्रमोद-कणिका | (पृ३५) | ईर्ष्याभिषेकः | (पृ५९) |
| दात्यूहः | (पृ३६) | मदनकडकम् | (पृ६२) |
| रक्तकण्ठः | (पृ३७) | कलाची | (पृ६२) |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## दशमं परिशिष्टम् (१०)

# नाटकविषयक—कतिपय-पारिभाषिकशब्दाः (लक्षणसहिताः)

### प्रकरणम्

(अ) यत्र कविरात्मशक्त्या वस्तु शरीरं च नायकं चैव ।
औत्पत्तिकं प्रकुरुते प्रकरणमिति तद् बुधैर्ज्ञेयम् ।।

यदनार्षमथाहार्यं काव्यं प्रकरोत्यभूतगुणयुक्तम् ।
उत्पन्नबीजवस्तु प्रकरणमिति तदपि विज्ञेयम् ।।

यन्नाटके मयोक्तं वस्तु शरीरं च वृत्तिभेदाश्च ।
तत्प्रकरणेऽपि योज्यं सलक्षणं सर्वसन्धिषु तु ।।

विप्रवणिक्सचिवानां पुरोहितामात्यसार्थवाहानाम् ।
चरितं यन्नैकविधं ज्ञेयं तत्प्रकरणं नाम ।।

नोदात्तनायककृतं न दिव्यचरितं न राजसंभोगम् ।
बाह्यजनसंप्रयुक्तं तज्ज्ञेयं प्रकरणं तज्ज्ञैः ।।

दासविटश्रेष्ठियुतं वेशास्त्र्युपचारकारणोपेतम् ।
मन्दकुलस्त्रीचरितं काव्यं कार्यं प्रकरणे तु ।।

सचिवश्रेष्ठिब्राह्मणपुरोहितामात्यसार्थवाहानाम् ।
गृहवार्ता यत्र भवेन्न तत्र वेश्याङ्गना कार्या ।।

यदि वेशयुवतियुक्तं न कुलस्त्रीसङ्गमोऽपि स्यात् ।
अथ कुलजनप्रयुक्तं न वेशयुवतिर्भवेत्तत्र ।।

यदि वा कारणयुक्त्या वेशकुलस्त्रीकृतोपचारः स्यात् ।
अविकृतभाषाचारं तत्र तु पाठ्यं प्रयोक्तव्यम् ।। नाट्यशास्त्रम् १८.४५–५३

(आ) अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम् ।
अमात्यविप्रवणिजामेकं कुर्याच्च नायकम् ।।

धीरप्रशान्तं सापायं धर्मकामार्थतत्परम् ।
शेषं नाटकवत् संधिप्रवेशकरसादिकम् ।।

नायिका तु द्विधा नेतुः कुलस्त्री गणिका तथा ।
क्वचिदेकैव कुलजा वेश्या क्वापि द्वयं क्वचित् ।।

कुलजाभ्यन्तरा बाह्या वेश्या नातिक्रमोऽनयोः ।
आभिः प्रकरणं त्रेधा संकीर्णं धूर्तसंकुलम् ।। दशरूपकम् ३. ३९–४२

(इ) प्रकरणं वणिग्–विप्र–सचिव–स्वाम्यसङ्करात् ।
मन्दगोत्राङ्गनं दिव्यानाश्रितं मध्यचेष्टितम् ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दास–श्रेष्ठि–विटैर्युक्तं क्लेशाढ्यं तच्च सप्तधा ।
कल्प्येन–फल–वस्तूनामेक–द्वि–त्रि–विधानतः ॥
कुलस्त्री गृहवार्तायां, पण्यस्त्री तु विपर्यये ।
विटे पत्यौ द्वयं तस्माद्, एकविंशतिधाऽप्यदः ॥
अत्राकल्प्यं पुरा क्लृप्तं यद्वाऽनार्षमसद्गुणम् ।
शेषं नाटकवत् सर्वं कैशिकीपूर्णतां विना ॥ —नाट्यदर्पणम् २.१–४

## नान्दी

(अ) आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।
सूत्रधारः पठेत्तत्र मध्यमं स्वरमाश्रितः ।
नान्दी पदैर्द्वादशभिरष्टभिर्वाऽप्यलङ्कृताम् ॥
नमोऽस्तु सर्वदेवेभ्यो द्विजातिभ्यः शुभं तथा ।
जितं सोमेन वै राज्ञा शिवं गोब्राह्मणाय च ॥
ब्रह्मोत्तरं तथैवास्तु हता ब्रह्मद्विषस्तथा ।
प्रशास्त्विमां महाराजः पृथिवीं च ससागराम् ॥
राष्ट्रं प्रवर्धतां चैव रङ्गस्याशा समृध्यतु ।
प्रेक्षाकर्तुर्महान्धर्मो, भवतु ब्रह्मभाषितम् ।
काव्यकर्तुर्यशश्चास्तु धर्मश्चापि प्रवर्धताम् ।
इज्यया चानया नित्यं प्रीयन्तां देवता इति ॥
नान्दीपदान्तरेष्वेषु ह्येवमार्येति नित्यशः ।
वदेतां–सम्यगुक्ताभिर्वाग्भिस्तौ पारिपार्श्विकौ ॥
एवं नान्दी विधातव्या यथावल्लक्षणान्विता ।

—नाट्यशास्त्रम्

(आ) देव–भूप–सभा–भर्तृ–मुख्यानां मङ्गलाभिधा ।
नित्या रूपमुखे नान्दी, पदैः षड्भिरथाष्टभिः ॥

मुख्यग्रहणं सरस्वती-कवि-प्रभृतीनामुपलक्षणार्थम् । मङ्गलाभिधा सद्भूतगुणोत्कीर्तनमाशीर्वचनं वा । नित्या एवंविधरूपैव,...... अवश्यम्भावाद् वा नित्यत्वम्, शेषाणां रङ्गाङ्गानां नावश्यंभावः, अहरहः प्रयोज्यत्वाद् वा नित्यत्वम् । यावद्धि रूपकस्याभिनयस्तावदेषा नान्दी प्रयोक्तव्यैव । रूपकस्य नाटकादेर्मुखे प्रारम्भे नान्दी प्रयोगस्थानकथनमेतत् । नान्दीत्वं च मङ्गलाभिधायाः प्रत्यूहापसारणेन समृद्धिजनकत्वात् । पदानि वाक्याङ्गानि । केचित् तु 'पूर्णवाक्यापेक्षयाऽवान्तरवाक्यानि पदानि' इत्याहुः । .... नान्दी त्ववश्यम्भावित्वान्मङ्गलाभिधानपूर्वकत्वाच्च शुभकृत्यारम्भस्येति लक्षिता । अत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव कवयो रूपकारम्भे 'नान्द्यन्ते सूत्रधारः' इति पठन्ति । यत्र तु कविकृता नान्दी न दृश्यते, तत्रापि रङ्गसूत्रणाकर्तृकृता द्रष्टव्या । नान्दीपाठकाश्च सूत्रधार-स्थापकपारिपार्श्विका इति ।
—नाट्यदर्पणम् ३.१.

(इ) नन्दति देवता अस्याम्, नन्दन्ति देवताः अस्याम्, नन्दयति देवतां देवताः वा, इति नान्दी । नन्दिः आनन्दः, देवतायाः देवतानां वा, तस्याः इयं नान्दी । अथवा नन्दः (आनन्दः देवतायाः देवतानां वा) एव नान्दः । प्रज्ञादिभ्योऽण् डिड्ढाणञिति ङीप् । नान्दी । नन्दन्ति सामाजिकाः अस्याम्, नन्दयति सामाजिकान् इति वा नान्दी ।
—अश्वत्थामाचार्यः ("वेणीसंहार"-आवृत्तौ)

## आमुखम्

(अ) नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्योत्थैर्वीथ्यङ्गैरन्यथापि वा ।
आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि वा ॥
उद्घात्यकः कथोद्घातः प्रयोगातिशयस्तथा ।
प्रवृत्तकावलगिते पञ्चाङ्गान्यामुखस्य तु ॥
.... .... .... .... ....
सूत्रधारस्य वाक्यं वा यत्र वाक्यार्थमेव वा ।
गृहीत्वा प्रविशेत् पात्रं कथोद्घातः स कीर्तितः ॥
.... .. .......... .......
एषामन्यतमं श्लिष्टं योजयित्वार्थयुक्तिभिः ।
पात्रग्रन्थैरसंबाधं प्रकुर्यादामुखं ततः ॥

—नाट्यशास्त्रम् २०.३०,३१,३३,३५,३८

(आ) सूत्रधारो नटीं ब्रूते मार्षं वाथ विदूषकम् ॥
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ।
प्रस्तावना वा तत्र स्युः कथोद्घातः प्रवृत्तकम् ॥
प्रयोगातिशयश्चाथ वीथ्यङ्गानि त्रयोदश ।

तत्र कथोद्घातः—

स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः ।
गृहीत्वा प्रविशेत् पात्रं कथोद्घातो द्विधैव सः ॥

—दशरूपकम् ३.७–१०

(इ) विदूषक-नटी-मार्षैः, प्रस्तुताक्षेपि भाषणम् ।
सूत्रधारस्य वक्रोक्ति-स्पष्टोक्तैर्यत् तदामुखम् ॥
वाक्यार्थ-समयाह्वानैर्भाणोक्तैः पात्रसङ्क्रमः ।

—नाट्यदर्पणम् ३.३–४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रधारः चतुरातोद्यनिष्णातोऽनेकभाषासमावृतः ।
नानाभाषणतत्त्वज्ञो नीतिशास्त्रार्थतत्त्ववित् ॥
नानागतिप्रचारज्ञो रसभावविशारदः ।
नाट्यप्रयोग–निपुणो नानाशिल्पकलान्वितः ॥
छन्दोविधानतत्त्वज्ञः सर्वशास्त्रविचक्षणः ।
तत्तद्गीतानुगलयकलातालावधारणः ॥
अवधानप्रयोक्ता च योक्तॄणामुपदेशकः ।
एवंगुणगणोपेतः सूत्रधारोऽभिधीयते ।

— मातृगुप्ताचार्यः

नाट्योपकरणादीनि सूत्रमित्यभिधीयते ।
सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते ॥
आसूत्रयन् गुणान् नेतुः कवेरपि च वस्तुनः ।
रङ्गप्रसाधनप्रौढः सूत्रधार इहोदितः ॥
नाट्यस्य यदनुष्ठानं तत् सूत्रं स्यात् सबीजकम् ।
रङ्गदैवतपूजाकृत् सूत्रधार उदीरितः ॥
वर्तनीयकथासूत्रं प्रथमं येन सूच्यते ।
रङ्गभूमिं समासाद्य सूत्रधारः स उच्यते ॥

## नाट्योक्तयः

(अ) दूरस्थाभाषणं यत्स्यादशरीरनिवेदनम् ॥
परोक्षान्तरितं वाक्यमाकाशवचनं तु तत् ।
तत्रोत्तरकृतैर्वाक्यैः संलापं संप्रयोजयेत् ॥
नानाकारणसंयुक्तैः काव्यभावसमुत्थितैः ।
हृदयस्थ–वचो यत्तु तदात्मगतमिष्यते ॥
सवितर्कं च तद् योज्यं प्रायशो नाटकादिषु ।
निगूढभावसंयुक्तमपवारितकं स्मृतम् ॥
कार्यवशादश्रवणं पार्श्वगतैर्यज्जनान्तिकं तत् स्यात् ।
हृदयस्थं सविकल्पं भावस्थं चात्मगतमेव ॥
इति गूढार्थयुक्तानि वचनानीह नाटके ।
जनान्तिकानि कर्णे तु तानि योज्यानि योक्तृभिः ॥
पूर्ववृत्तं तु यत्कार्यं भूयः कथ्यं तु कारणात् ।
कर्णप्रदेशे तद्वाच्यं मागात्तत्पुनरुक्तताम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हस्तमन्तरितं कृत्वा त्रिपताकं प्रयोक्तृभिः ।
जनान्तिकं प्रयोक्तव्यमपवारितकं तथा ॥

—नाट्यशास्त्रम् २५.८६–९२,९४

(आ) नाट्यधर्ममपेक्ष्यैतत् पुनर्वस्तु त्रिधेष्यते ॥

सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च ।
सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम् ॥

द्विधान्यन्नाट्यधर्माख्यं जनान्तमपवारितम् ।
त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ॥

अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम् ।
रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम् ॥

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।
श्रुत्वेवानुक्तमप्येकस्तत्स्यादाकाशभाषितम् ॥

—दशरूपकम् १.६३–६७

(इ) प्रकाशं ज्ञाप्यमन्येषां, स्वगतं स्वहृदि स्थितम् ।
परावृत्य रहस्याख्याऽन्यस्मै तदपवारितम् ॥

त्रिपताकान्तरोऽन्येन, जल्पो यस्तज्जनान्तिकम् ।
आकाशोक्तिः स्वयं-प्रश्न-प्रत्युत्तरमपात्रकम् ॥

उक्तत्वाद् वक्ष्यमाणत्वाद्, भूयः कार्याद् यदुच्यते ।
तत् कर्णे श्रावयेद् येन, न याति पुनरुक्तताम् ॥

उक्तं पूर्वं वक्ष्यमाणं पुरः प्रकाश्यमानं, प्रयोजनवशाद् भूयोऽपि यद् वृत्तमुच्यते तत् पुनरुक्तताभयात् पात्रस्य कर्णे कविः श्रावयेत् । तथा च दृश्यते 'कर्णे एवमेव' ।

—नाट्यदर्पणम् १.१२–१३,१६ (सविवरणम्)

विष्कम्भकः मध्यमपुरुषैर्नित्यं योज्यो विष्कम्भकोऽत्र तत्त्वज्ञैः ।
संस्कृतवचनानुगतः संक्षेपार्थः प्रवेशकवत् ॥

शुद्धः संकीर्णो वा द्विविधो विष्कम्भकोऽपि कर्तव्यः ।
मध्यमपात्रः शुद्धः संकीर्णो नीचमध्यकृतः ॥

प्रवेशकः अङ्कान्तरालविहितः प्रवेशकोऽर्थक्रियां समभिवीक्ष्य ।
संक्षेपात्सन्धीनामर्थानां चैव कर्तव्यः ॥

—नाट्यशास्त्रम् १८.५४–५५–५६

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकानेककृतः शुद्धः संकीर्णो नीचमध्यमैः ।

तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः ।
प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः ॥

—दशरूपकम् १.५९-६१

अङ्कानर्हस्य वृत्तस्य त्रिकालस्यानुरञ्जना ।
संक्षिप्य संस्कृतेनोक्तिः अङ्कादौ मध्यमैर्द्वमैः ॥

शुद्धो विष्कम्भकस्तत्र, संकीर्णो नीचमध्यमैः ।
अङ्कसंधायकः शक्यसंधानातीतकालवान् ॥

एवं प्रवेशको नीचैः, परार्थैः प्राकृतादिना ।
एतौ प्रभूतकार्यत्वात्, नाटकादिचतुष्टये ।

—नाट्यदर्पणम् १.२३-२५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# शुद्धिपत्रम्

| पृ. | पं. | एवं पठितव्यम् |
|---|---|---|
| १ | १९ | तर्हि |
| ३ | १४ | वधूटी |
| ३ | २३ | द्यूतकाराः...दुर्गोदर० |
| ४ | ३ | द्यूतकारस्य |
| ४ | ६ | महापुरुषगर्हितो |
| ४ | १० | पञ्चत्व० |
| ४ | १५ | कुलीनो० |
| ५ | २९ | मां त्वरयित्वा |
| ६ | १४ | पूएभि |
| ६ | २२ | हं हो |
| ७ | ३ (छाया) | आभरणानि |
| ८ | २४ | ० :खेन |
| ९ | १२ | पुणो |
| १० | १७ | स्वभवनम् |
| १० | २० | दीप० |
| १५ | ७ | ०निर्णयो |
| १५ | १४ | लीयकानि० |
| १८ | १८ | भवेनों |
| २० | १९ | सौधं |
| २१ | २ | यतो |
| २१ | ४ | समर्पितः |
| २२ | ३ | वीक्षते |
| २३ | ४ | कढिण |
| २७ | १२ | चन्द्रलेखा |
| २८ | १९ | परमधार्मिक० |
| २९ | १९ | ०वैशसम् |
| ३३ | १२ | हा निक्करुणे |
| ३५ | १९ | भोदि |
| ३७ | २२ | मकरन्दः |
| ३९ | ३ | तर्हि |
| ४० | २० | प्रतिपद्यते |
| ४० | २६ | सिद्धायतनम् |
| ४३ | २ (छाया) | गन्धमूषिकां |
| ४३ | २ (छाया) | वैश्रवणेन |
| ४४ | ८ | शुष्यति यन्नैव |
| ४४ | ६ (छाया) | तिस्रः |
| ४७ | ५ | कर्कश० |
| ४७ | २० | श्वशुर |
| ४७ | २१ | वक्रोक्ति० |
| ४८ | २६ | स्त्रीणां |
| ४८ | २ (छाया) | मर्तव्ये |
| ४९ | १५ | कुसुम |
| ५० | ४ | अवलम्बस्व |
| ५१ | ७ | निसर्गसिद्धा-- |
| ५१ | २३ | ल्लवसे |
| ५२ | १६ | जीविकां |
| ५२ | २५ | मृत्युकालः |
| ५५ | ५ | दुराग्रहेणाऽऽत्मनः |
| ५५ | २० | चित्राङ्गदं प्रति प्रतिकूला |
| ५६ | २४ | तर्हि |
| ५७ | १५ | प्रसाधनमपहस्तयति |
| ५८ | ३ | मर्मर० |
| ५८ | ४ | वह्नि० |
| ५९ | ६ | भवत्यां |
| ५९ | ७ | ०मपगत० |
| ५९ | ९ | ०गच्छन्नाम्बु० |
| ५९ | १८ | शस्त्रे त्वयि |
| ६२ | २ | वैश्रवणौ |
| ६२ | १ (छाया) | समाश्वसिहि समाश्वसिहि |
| ६२ | २३ | मदनकटकं |
| ६३ | २८ | (सविषादम् ) |
| ६४ | १ | अकुतोभयो |
| ६४ | २१ | किं ते भूयः |
| ६४ | २६ | स्वतन्त्रश्चिरं |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org